M - 2682

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
धर्मप्रवृत्ति	-	धर्म	पूर्ण	-	3/6	230	संस्कृत	कागद	10	22		

धर्मप्रवृत्ति

इदं पुस्तक नारायणधामभटारस्य

॥श्रीगणेशायनमः॥श्रीभवानीशंकराभ्यांनमः॥अथधर्म
प्रवृत्तिर्लिख्यते॥ नारायणंनमस्कृत्यसकामदांचसरस्वतीम्॥
गणनाथंगुरूंश्चापिधर्मसंप्रप्रणम्यवै॥१॥धर्मप्रवृत्तिर्लि
ख्यतेकलौनारायणेनतु॥विदुषांधर्मनिष्ठानांसंपत्तिंधर्म
वर्द्धिनीम्॥२॥आलोक्यधर्मशास्त्राणिमन्वाद्यषिहिता
निवै॥आश्वलायनसूत्रंचवृत्तिंनारायणींतथा॥३॥सार
मेवसमुद्धृत्यस्मृतीनांवचनंयथा॥सिद्धांतानिसमूला
निविचार्यलिख्यतेमया॥४॥शैवादिकाःप्रवक्ष्यामिक्रि ३
याश्चानुक्रमेणतु॥तिथीनामपिसर्वासांनिर्णयामप्यसंश
यात्॥५॥योगीश्वरः॥यस्मिन्देशेमृगःकृष्णःस्तस्मिन् ॥१॥

न्धर्मान्निवोधिता॥ धर्मसंरक्षणार्थायतस्मिन्देशेवसेद्द्विजः॥६॥ अथात्मचिंतनं॥ उषःकाले समुत्थायचिंतयेदात्मनोहितं॥स्मृत्वानारायणंदेवंस्तोत्राण्यपिसंजपेत॥७॥
अथमौनविधिः॥ प्रभाते मैथुनेचैवप्रस्रावेदंतधावने॥ स्नानेभोजनकालेच मौनंषट्सुविधीयते॥८॥ याज्ञवल्क्यः॥
ग्रामात्सपरिसज्जनमूत्रंकुर्याज्जलाशये॥ रात्रौहस्तं पुरीषेतु नदीतीरेच तुर्गुणं॥९॥ याज्ञवल्क्यः॥ दिवासंध्यासुकर्णस्थब्रह्मसूत्रंउदङ्मुखः॥ कुर्यान्मूत्रपुरीषेतुरात्रौचेद्दक्षिणमुखः॥१०॥ ब्रह्मचारीविषयमितिकेचित्॥ एकवस्त्रविषयमितिकेचित्॥ वसिष्ठः॥ स्नात्वायज्ञोपवीतंतुपृष्ठ

३

तः कं[illegible] लंबितं ॥ विण्मूत्रे च गृही कुर्याद्यदा कर्णे समाहितं ।
मूत्रे तु दक्षिणे कर्णे पुरीषे वामकर्णके ॥ धारयेद्ब्रह्मसूत्रं तु
मैथुने तूपवीतवत् ॥ १२ ॥ अंतर्धाय तृणैर्भूमिं शिरः प्राव
त्य वाससा ॥ वाचं नियम्य यत्नेन ष्ठीवनोच्छ्वासवर्जितः ॥
॥ १३ ॥ कृत्वा समौ पादपृष्ठौ मलमूत्रं समुत्सृजेत् ॥ अन्य
था कुरुते यस्तु मलं प्राश्यति स द्विजः ॥ १४ ॥ फालकृष्टे जले
चित्यां वल्मीके गिरिमस्तके ॥ देवालये नदीतीरे दर्भे पुष्पे
षु शाद्वले ॥ १५ ॥ सच्छायासु वृक्षेषु मार्गे गोष्ठांबु भस्म
सु ॥ अग्नौ च गच्छंस्तिष्ठंश्च विष्ठामूत्रं च नोत्सृजेत् ॥ १६ ॥
वाय्वग्न्यर्कगोसोमां श्वसंध्यांबुस्त्रीद्विजन्मतः ॥ पश्य ॥ २ ॥

४ चतुर्णां नपिस्तानां प्राणिनां नीव योजनः ॥ प्राणि भ्यो पिम त्रिः सर्वेषु
प्युषमी यिनः । मतिम प्रयान राज्ञे प्रास्ये भ्यस्ये प्रातु वाऽब्राः ॥ वि प्रो भ्यो दि

नभिमुखांश्चेतान्विष्ठांमूत्रं चनोत्सृजेत् ॥१७॥ मनुः ॥ अ
रण्ये उदके रात्रौ चोरव्याघ्रकुलेपथि ॥ कृते मूत्रपुरीषे च
द्व्यहस्तो न दुष्यति ॥ काष्ठादिनाप्यपानस्थमर्ध्यं निमृ
जीत वै ॥ कंदमूलफलांगारैर्नाभेर्ध्यं निमृजीत वै ॥ मूत्रं हु
त्वा विनाशौचं कृष्ठं व ध्याद्दिनौतमः ॥ कथितो मूत्रपुच्छो
च समर्दो नरकं व्रजेत् ॥ इति मूत्रपुरीषोत्सर्गः ॥ शौचं ॥
तीर्थं शौचं न कुर्वीत कुर्वीतोद्धृतवारिणा ॥ नाभिमात्रं ज
लं स्नात्वा कुर्याच्छौचं च मनुरब्रवीत् ॥ स्मृत्यर्थसारे ॥ शौचं तु द्वि
धं प्रोक्तं बाह्यमभ्यंतरं तथा ॥ मृज्जलाभ्यां स्मृतं बाह्यं भाव
शुद्धिस्तथांतरं ॥ गृहीतत्रिः शंको याप मध्वि र मुध्दतेर्ज

धा वि कीता ति दुष्ट ः प्राग विस्तर

५०

प्रयोग

ते:॥ गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः॥ स्मृतिः॥
मृच्छुभ्रवर्णा विप्रस्य क्षत्रस्य रक्तमृत्तिका॥ वैश्यस्य पी
तवर्णा तु शूद्रस्य कृष्णामृत्तिका॥ स्मृत्यर्थसारे॥ अंतर्ज
ले देवगृहे वल्मीके मूषकस्थले॥ कृतशौचावशिष्टा च वर्ज
याः पंच मृत्तिकाः॥ मच्च मूत्रसमीपे वाच क्ष मृच्छ
स्थिता च या॥ वापीकूपतडागेषु न ग्राह्याः पंच मृत्तिकाः॥
मार्गे स्वरस्मशानस्थां पांसुलां मालिनां त्यजेत्॥ कर्य
गारास्थिरहितां नाहरेच्छर्करान्विता॥ अंतर्जलगताया
च दूरतो मा एवं धनात्॥ अरण्यकेषु चैवं स्याद्ग्रामे चा
हरणं विदुः॥ स्मृतिः॥ आहरेन्मृत्तिकां विप्रः कूलात्स

२ ॥२॥

रितकूलयोः॥ शुद्धदेशोतु संवीक्ष्य त्राकरास्मभविवर्जितां॥
अभावेमदयुक्ताया यस्मिन्देशेतु याभवेत्॥ तयाशौचं
प्रकुर्वीत तद्विजो मृत्तिकयापिच॥ अर्द्धप्रसृतमात्रांतु प्र
थमामृत्तिकास्मृता॥ द्वितियातु तृतीयातु तदर्द्धा प्रकी
र्तिताः॥ त्रिपर्वपूर्वमात्रावा मृत्तिकाक्षप्रमाणकाः॥
आर्द्रामलकमात्रा वा मृत्रशौचेतु मृत्तिका॥ एकालिं
गेकरे तिस्रउभयोर्मृद्वयंस्मृतं॥ पंचापानेदशैकस्मिन्नु
भयोः सप्तमृत्तिका॥ एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्म
चारिणाम्॥ वानप्रस्थस्य त्रिगुणं यतीनां च चतुर्गुणं॥
दिवायद्विहितं शौचं तदर्द्धं निशिकीर्तितम्॥ तदर्धमा

तुरेणोक्तमात्तुरस्यार्द्धमध्वनि ॥ स्त्रीशूद्रादेरशक्तानां
बालानां चोपवीतिनां ॥ गंधलेपक्षयकरं शौचं कुर्या
दतंद्रितः ॥ शौचे यत्नः सदा कार्यः शौचमूलो द्विजस्म
तः ॥ शौचाचारविहीनस्य सकला निष्फलाः क्रियाः ॥
मूत्रं वाथ मलं विप्रो यस्मात्ता विसर्जयेद्यदि ॥ आजंघं
क्षालयेन्मूत्रे द्विराचम्य कटिं मले ॥ मूत्रात्तु द्विगुणं
शुक्रे मैथुने त्रिगुणं स्मृतं ॥ कच्छां तु शौचयेत्तिरन्य
था शुचितामियात् ॥ पादपृष्ठे पादमूले तिस्रस्तिस्र
श्च मृत्तिकाः ॥ एकैकपाम्मदापादौ हस्तौ प्रक्षालये ॥ ? ॥
त्ततः ॥ वामं प्रक्षालये सादं शूद्रादेर्वार्थकेचन ॥ शौ

र० शि

चांतेवामपादं तु पश्चाद्दक्षिणमेवच ॥ इति शौचविधिः ॥
अथ गंडूषविधिः ॥ चतुरष्टद्विषड्घाष्ट गंडूषैः शुध्यते क्र
मात् ॥ मूत्रे पुरीषे भुक्तांते रेतःप्रस्रवणे पि च ॥ पुरतः
सर्वदेवाश्च दक्षिणे पितरस्तथा ॥ ऋषयः पृष्ठतः सर्वे वा
मे गंडूषमुत्सृजेत् ॥ प्राङ्मुखो वाप्युदङ्मुखो द्विराचम्य
ततः परं ॥ उक्तकाष्ठेन कुर्वीत वाग्यतो दंतधावनं ॥
स्मृतिः ॥ मुखे पर्युषिते यस्माद्भवेदशुचिमान्नरः ॥
ततः कुर्यात्प्रयत्नेन शुध्यर्थं दंतधावनं ॥ खदिरश्च क
रंजश्च करंबुश्च वटस्तथा ॥ तिंतिणिर्वेणुपृष्ठश्च आम्रा
म्रनिंबस्तथैव च ॥ अपामार्गश्च बिल्वश्च ह्यर्कश्चौदुं

ध॰

॥५॥

श्र्व॰ति॰

वरस्तथा ॥ एतेप्रशस्ताः कथितादंतधावनकर्मसु ॥
समिद्धः क्षीरवृक्षस्यप्रमाणंद्वादशांगुलं ॥ कनिष्ठि
काग्रवत्स्थूलंपूर्वार्द्धकृतकूर्चकं ॥ अथनिषिद्धवृ
क्षाः ॥ स्मृतिसारसमुच्चये ॥ गुवाकतालहिंतालाःके
तकीचमहावटः ॥ खर्जूरनारिकेलाश्चसप्तैतेतृण
राजकाः ॥ तृणराजसमोपेतंयःकुर्याद्दंतधावनं ॥
नरःश्चांडालयोनिस्याद्यावद्गंगांनपश्यति ॥ अथ
वर्ज्यतिथिः ॥ स्मृतिसंग्रहे ॥ अभ्यंगेचोदधिस्नाने
दंतधावनमैथुने ॥ जातेचनिधनेचैवचतिथिस्तात्का
लिकीस्मृता ॥ प्रतिपत्सचषष्ठीषुनवमीद्वादशी

॥५॥

षु च॥ दंत्तानां काष्ठसंयोगोत्र यत्नेन विवर्जयेत्॥ स्मृतिः॥
अर्के चवैधृतोपातिसंक्रांत्यां जन्मवासरे॥ वर्जयेद्दंतका
ष्ठं तु नंदासु द्दिषु च पर्वसु॥ तृणैः पर्णैः सदा कुर्यादमाल्का
दर्शं विना॥ तयोरपि च कर्तव्यं जंबूनिंबाम्रपल्लवैः॥
स्मृतिः॥ एकादश्यां लैं तपर्णैः कर्तव्यं दंतधावनं॥ स्मृ
त्यंत्व मनं कृत्वा व्रतसंकल्पमाचरेत्॥ उदिते च सहस्रां
शो यः कुर्याद्दंतधावनं॥ स चिताभक्षितस्तेन पितवं
शास्त्रघातकः॥ स्मृत्यंतरेपि॥ अंगारवालुकाभिश्च भ
स्मांगुल्ये नरवैरपि॥ इष्टिकालोष्टपाषाणैर्न कुर्याद्दंत
धावनं॥ अभावे दंतकाष्ठानां निषिद्धामांतिथौ तथा॥

अपां द्वादशगंडूषैर्मुखशुद्धिर्भविष्यति ॥ इति दंतधावनविधिः ॥ अथस्नानविधिः ॥ उत्तमं तु नदीस्नानं तडागे मध्यमं स्मृतं ॥ कूपस्नानं च सामान्यं भांडस्नानं यथा वृथा ॥ नदीषु देवखातेषु प्रातः स्नायाद्दिने दिने ॥ नदी भावे तडागे वा कूपस्नानं समाचरेत् ॥ जले निमज्य बध्नीयाच्छिखां मा च व्ययलतः ॥ पुनराचम्य संकल्प्य न घां स्नानं समाचरेत् ॥ विष्णुः ॥ सप्रहां प्रातः स्नायी द्विजः शूद्रत्वमाप्नुयात् ॥ तस्मात्स्नानं प्रकर्तव्यं रविवारे सदैव हि ॥ मनुः ॥ अत्यंतमलिनः कायो नवच्छिद्रसमन्वितः ॥ स्रवत्येव दिवा रात्रौ प्रातः स्नानं वि

॥६॥

विन्नो धनं ॥ नदीगतुमराच्छश्चेद्देहे वास्नान माचरेत्त ॥
स्वयं चैवाथ निशिष्येश्चपुत्रैर्मोद्धृत्तवारिणा ॥ पाराश
र: ॥ नस्नायाच्छूद्रहस्तेन नैकहस्तेन चा तथा ॥ उद्धृता
भिरपिस्नायाद्धृताभिर्द्विजातिभि: ॥ स्म्रत्यर्थसा
रे ॥ जानुमात्रे जले तिष्ठं नाचामं न हि दुष्यति ॥ उप
विष्ट: समाचामेज्जानुमात्रादधोजले ॥ द्विराचम्यानि
मज्जाथ पुनरेव द्विराचमेत् ॥ मंत्रेणैव शिखां बध्वा
प्राणायामं ततश्चरेत् ॥ यम: ॥ कराभ्यां धारयेद्भौम्छि
खाबंधं विधाय च ॥ प्राणायामं तत: कुर्यात्संकल्पं च समु
च्चरेत् ॥ विष्णु: ॥ नाभिमात्रे जके तिष्ठन् सप्तदाद श्रांप
नाभिमात्रे जले स्थित्वा लोष्ट लोकेशान्दिव्या दिश: ॥ निरुद्धकर्णनासश्च

प्र०

वच्च ॥ त्रिवारमपिचास्तत्स्नानमेवाविधीयते ॥ स्नात्वा
पदेहं प्रक्षाल्यपुनस्नानाद्विराचमेत ॥ आपोहिष्ठाभिर्न
वभिर्वारुणैर्मार्जयेदथ ॥ सागुष्ठं यत्तस्तत्रेणत्रिः प्रदक्षिण
माचरेत् ॥ याः प्रवतइतिजपेदिमंमेगंगइस्तच ॥ स्मृतिः ॥
संकल्पंसूक्तपठनंमार्जनंचाघमर्षणं ॥ देवादितर्पणंचै
वपंचांगंस्नानमाचरेत ॥ वसिष्ठः ॥ स्रोतसाभिमुखंस्नाय
न्मार्जनं चाघमर्षणं ॥ अन्यत्रार्कमुखोरात्रौ प्राङ्मुखोपि
मुखोपिवा ॥ स्रोतसाभिमुखोमज्जेयत्रापःप्रवहंतिचा
स्थावरेषु च सर्वेषुह्यादिसाभिमुखस्तथा ॥ याया स्समु
द्रगानद्यस्तासुस्नानंतुसन्मुखं ॥ सर्वेषां स्नानं विनामेव ॥ ७ ॥
विनावाजसनेयिनः ॥ प्रयोगपारिजातः साराबल्यां ॥ गो

५ प्रस्कव आपस्तंकेन मवृत्ते हेळंइ स्वच्छा

मथ स्नानं ॥ आचम्य गोमयं वा महस्ते धृत्वा विभज्य च ॥ त्रे
धा तत्प्रणवेनैव संप्रोक्ष्य भूर्भुवस्वरोम् ॥ सर्वदिक्षु क्षिपे
त्किंचिद्दोमयं प्रणवेन तु ॥ मानस्तोक इति मंत्रमुच्चार्य तदभि
मंत्रयेत् ॥ गंधद्वारामिसनेन मस्तकाद्यनुलेपयेत् ॥ उदुत्त
मं मुमुग्धि नो हिरण्यशृंगमिसपि ॥ याः प्रवत्त इसेकयाजल
मध्ये प्रवेशयेत् ॥ सुमित्रिया न इति जलं दक्षिणेप्र क्षिपे
द्धरिः ॥ नमो नारायणायेति चतुरस्रं प्रकल्पयेत् ॥ तीर्थं पु
ष्करसंज्ञं यत्र सान्निहितो हरिः ॥ इदं विष्णुरित्यनेन मंत्रेण र
विमीक्षयेत् ॥ सप्ताहृतिकां गायत्रीं जप्त्वा स्नानं समाचरेत् ॥
द्विराचम्य जलेनैव धृत्वा चैवोर्ध्वपुंड्रकं ॥ अंतश्चरति स
चम्य समुद्राद्रूर्मि [illegible]सध ॥ आपो अस्मान्गायत्र्याचरिरे

साध्यभिषेचयेत्॥ ततः स्नात्वाद्विराचम्य संबयोयंति वैज
पेत्॥ आपोहिष्ठेममेगंगेसत्वन्नोअग्नइत्यथ॥ व्याहृतिभि
श्च मंत्रांते कुशैर्मार्जनमाचरेत्॥ आपोहिष्ठादिभिर्मंत्रै
र्जलमात्मसेऽवेततः॥ ऋतंचेत्यादिभिर्मंत्रैरघमर्षणं कु
र्भवेत्॥ हंसः शुचिषदित्येकांपुतंपवित्रेणेतिच॥ सव्याहृ
तिगायत्रीं त्रिर्जप्त्वार्घ्यानि मज्जयेत्॥ अथाचम्य ततो विष्णो
र्नामभिः केशवादिभिः॥ द्वादशभिर्निमज्ज्याथ ऋतंचे
तिचवैजपेत्॥ हंसः शुचिषदित्येकां त्रिर्जपन्मूर्ध्नि सिंच
येत्॥ त्वन्नोअग्नइत्येकां च सत्वन्नोअग्नइत्यथ॥ तरत्स
इतिसूक्तंचजपंस्नात्वा समाचरेत्॥ अकारादिहकारांता
र्णा वर्णाः सर्वास्थिताः पठेत्॥ विप्रश्चानुक्रमेणैव स्नानका

लेतुसर्वद्द ॥ आग्ना अग्नइहावसे ॥ अधीवासंपरि ॥ अयं
यत्तोदेवया: ॥ अग्नेभवसुसमिधा ॥ अतीयामनिद: ॥ अ
ग्निंदूतंपुरोदधे ॥ अग्नेबाधस्व ॥ आघामुरीय ॥ तद्विस्रो: ॥
यत्किंचेदं ॥ स्वरतोवर्णतोश्चैवजपेदेता ऋचस्मृत: ॥ त्रि
रापुत्यद्विराचम्यगायत्र्यास्नानमाचरेत्त ॥ स्नेनक: ॥ ह
स्ताभ्यांजलमादायसहृदेवाभिमंत्रितं ॥ मस्तकेच्चमुखेबा
कोहृदयेपृष्टदेशत: ॥ अभिषिंचेत्स्वमात्मानंगायत्र्यायो
निमुद्रया ॥ एवंकृवस्नानजपेष्टत्त्या बैस्तवींच ऋचंततः ॥
स्मृ स्नात्वविधिनास्नात्वाद्विराचम्यततः परं ॥ ग्रामण्या
मन्त्रयेद्वस्त्वासंकल्प्यतर्पयेसित्वरं ॥ अक्षतोदकपूर्णेन

देवतीर्थेन तत्त्वतः ॥ ब्रह्मादितर्पणं कुर्यात्प्राङ्मुखश्चोपवि
तयथ ॥ उदङ्मुखो नीवितीतु यवसंमिश्रितोदकैः ॥ कृष्ण
द्वैपायनादींश्च तर्पयेदृषितीर्थतः ॥ दक्षिणाभिमुखोभू
त्वा प्राचीनावीत्यतःपरं ॥ तर्पयेत्सित्ततीर्थेन तिलैःसो
मःपितृन्यथा ॥ यन्मया दूषितं तोयं शारीरमलसंभवं ॥
तेषां पापस्यविशुध्यर्थं यक्ष्माणं तर्पयाम्यहं ॥ असंस्कृता
श्च ये केचिज्जलाशाः पित्तरो मम ॥ तेषामाप्यायनायैत
द्दीयते सलिलं मया ॥ हस्ताभ्यां निक्षिपेत्तोयं तत्तीरे स
लिलाद्बहिः ॥ उत्तीर्य पीडयेद्वस्त्रं मंत्रतो दक्षिणे ततः ॥
ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः ॥ ते गृह्णं
तु द्वोषपरिहारार्थं

१७

तु भयादत्तंवस्त्रंनिष्पिडनोदकं ।।१८ भीष्मविसर्जपतत्तीरेउप
वीतिद्विराचमेत् ।। अर्द्धि नवस्त्रसंप्रोक्ष्यशु चीवइति
मंत्रतः ।। परिधायसुवस्त्रेतु युवंवस्त्रा ।। णि मंत्रतः ।। स्ना
त्वादेहंनमृज्जेतच्छिरोराग्यन्यथा द्विजः ।। योगी ।। तस्मा
त्कायंनमृज्जेतहांबरेणकरेणवा ।। नेश्वोल्लिहेनसाम्यं वपु
नः स्नानेनशुध्यति ।। तिस्रः कोट्यर्द्धकोटिचयानिलोमा
निमानुषे ।। वसंतिसर्वतीर्थानितस्मान्नपरिमार्जये
त् ।। पिबंतिशिरसैदेवापिबंतिपितरो सुखात् ।। मध्याच्च
यक्षगंधर्वा अधस्तात्सर्वजंतवः ।। सुरापानसमंतोयं
यक्षतः केशबिंदवः ।। दक्षिणेजानुनीतोयंवामेपुरुष

धृ०

॥१०॥

भवेत्॥वसिष्ठः॥स्नानं कृत्वा धृते वस्त्रे पतंति केशबिं
दवः॥तत्स्नानं निष्फलं ज्ञेयं पुनः स्नानेन शुध्यति॥अथ
वस्त्रविधिः॥श्रुतिस्मृतिप्रमाणेन ग्राह्यं वस्त्रं च धा
रयेत्॥षट्कर्माणि यतो ग्राह्यं वस्त्रं तु तत्तु न धारयेत्॥
वसिष्ठः॥अपवित्रपटो नग्नो नग्नश्चार्द्रपटः स्मृतः॥
नग्नश्च मलिनोद्वासो नग्नः कौपीनवानपि॥काषाय
वाससा नग्नो नग्नः स्नात्तर्षवानपि॥अंतः कच्छो ब
हिः कच्छो मुक्तकच्छस्तथैव च॥साक्षान्नग्नः स विज्ञेयो द
शनग्नाः प्रकीर्तिताः॥द्व्यंगुलं चतुरंगुलं वोत्तरीयं पट
निर्मितं॥काषायं कृष्णवस्त्रं च मलिनं केशभूषितं॥

प्रवृत्ति

॥१०॥

छिन्नाग्रं चोपवस्त्रं च कुत्सितं कर्मतो विदुः ॥ नग्नः काषा
यवासाः स्यान्नग्नः कौपिनकेवलः ॥ नग्नः संधितवस्त्र
श्च नग्नो विदग्धावस्त्रकः ॥ याज्ञवल्क्यः ॥ दग्धं जीर्णं च म
लिनं मूषकोपहतं तथा ॥ खादितं गोमहिष्याद्यैस्त्या
ज्यं सर्वथा द्विजे ॥ नीलिरक्तं तु यद्वस्त्रं दूरतः परिवर्जये
त् ॥ स्त्रीणां क्रीडार्थसंयोगे शयनीये न दुष्यति ॥ पालना
द्विक्रयाच्चैव तद्वृत्तेरुपजीवनात् ॥ अपवित्रो भवेद्वि
प्रस्त्रिभिः कृच्छ्रैर्विशुध्यति ॥ नीलिरक्तं यदा वस्त्रं वि
प्रः स्वांगेषु धारयेत् ॥ तंतुसंततिसंख्याकं वसेद्यमपु
रे ध्रुवं ॥ द्रव्यांतरयुतो नीली न दुष्यति कदाचन ॥ कंब

लेपहस्तेत्रे च नीत्ति दोषो न विद्यते ।। स्त्रियो वस्त्रं सदा त्याज्यं
मन्यवस्त्रं विवर्जयेत् ।। अधृतं कारुधृतं च पूर्वेद्युर्धृतमे
व च ।। त्रयमेतद्रसं बद्धं सर्वकर्मसु वर्ज्जयेत् ।। ईषद्धौतं
स्त्रिया धौतं शूद्रधौतं तथैव च ।। अधृतं तच्च विज्ञेयं शु
ष्कं दासिलपल्लवैः ।। अस्तुनोपीडयेद्वस्त्रं सर्वपापाद्दिज
सत्तमः ।। खट्वायाः शुष्कमुपरि तद्वस्त्रं न च धारयेत् ।।
धौतं च तु गृहे त्वा भुमावथं न निपीडयेत् ।। वामको
ष्ठे तु निक्षिप्य द्विराचम्य विशुध्यति ।। प्रागग्रमुदग
ग्रं वा धौतवस्त्रं प्रसारयेत् ।। प्रसङ्गक्षिलयोः कृत्वा पु
नः शौचं विधीयते ।। एकवस्त्रो न भुंजीयान्न कुर्याद्दे

वतार्चनं ॥ न कुर्यात्सितकर्माणि दानहोमजपादिकं ॥
खंडवस्त्रावृता श्चैव वस्त्रार्द्धप्रावृतस्तथा ॥ वचनं तस्य
नप्राप्तं श्वानोच्छिष्टं हविर्यथा ॥ स्नानं दानं जपं होमं स्वा
ध्यायं पितृकर्म च ॥ नैकवस्त्रो द्विजः कुर्याच्छ्राद्ध भोज
नसत्क्रियां ॥ वसिष्ठः ॥ उपवस्त्रं नवं श्वेतं तसंदशं ना
न्यधारितं ॥ अहतं तद्द्विजानीयात्सर्वकर्मसु पावनं ॥
दक्षिणोत्तरयोः कक्ष्योः कच्छं बध्नाति यो द्विजः ॥ नाभौ
च वामकुक्षौ च पृष्ठे चैव यथाक्रमं ॥ अथार्द्रवस्त्रनिषे
धोउनं ॥ स्नानं कृत्वार्द्रवस्त्रं तु उत्तरीयं च कद्धृतः ॥ घृ
तवस्त्रमधो कुर्यात् द्विचम्य च पुनर्द्वयं ॥ नोत्तरीयमधः

॥१२४॥

कुर्यान्नोपर्यस्थमंबरं ॥ अज्ञानाद्यदि कुर्वीत पुनः स्नाने
न शुध्यति ॥ धृत्वा वस्त्रं विधानेन करे वामे निधापयेत् ॥
आर्द्रं वस्त्रं द्विराचम्य निष्पीड्य पुनराचमेत् ॥ तथा च स्मृ
तिः ॥ निष्पीड्य वस्त्रमाचम्य ततः संध्यामुपासते ॥ म
ध्यान्हे तर्पणादूर्ध्वं वस्त्रं निःपीडनं भवेत् ॥ न घादि
स्नानतो गेहे स्नानवस्त्रं सदा द्विजः ॥ स्वयमेव च नि
ष्पीड्य स्त्रिया हस्तेन दापयेत् ॥ द्वादश्यां पंचदश्यां च
संक्रांतौ श्राद्धवासरे ॥ वस्त्रं निष्पीडयेन्नैव न च क्षारे
नियोजयेत् ॥ अथ सप्त स्नानानि ॥ याज्ञवल्क्यः ॥
मांत्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च ॥ वारुणं मा

॥१२॥

नसंचैवससस्नानोभ्यनुक्रमात् ॥ अत्रस्नानेत्वशक्तश्चे
संक्षिप्यस्नानमाचरेत् ॥ स्नानंचैवतुमध्याह्ने द्विजःकु
र्यात्सविस्तरं ॥ अथगृहस्नानं ॥ गृहेगंगाभिमुखंविंध्या
द्न्यत्राभिमुखंरवेः ॥ प्रवाहाभिमुखंकुर्यात्स्नानमेव
द्विजोत्तमः ॥ आपःस्वभावतोमेध्याकिंपुनर्वह्निसंयुताः ॥
अतःसंतःप्रशंसंतिस्नानमुष्णेनवारिणा ॥ अभ्यंगेचै
वमांगल्येगृहेचैवतुसर्वदा ॥ शीतोदकेननस्नायान्न
धार्यंगोपिचंदनं ॥ शीतास्वप्सुनिषिंच्योष्णाःशीतास्ना
सुनिषिंचयेत् ॥ ताभिःस्नानंगृहेप्रोक्तंनकुर्याच्छीत
वारिणा ॥ उपरागेर्कवारेचसंक्रांतोपातपर्वसु ॥ गृ

५० ॥१३॥

हेवापिप्रकुर्वीतस्नानंशीतोदकेनच॥ संकल्पंसूक्तपठनं
मार्जनंचाघमर्षणं॥ देवादितर्पणंचैवगृहेपंचविवर्जयेत्॥
गृहस्नानेनकुर्वीततर्पणंमार्जनंतथा॥ नांतराचमनंकु
र्यात्सश्चाद्दाचम्यशुध्यति॥ पादौप्रक्षाल्यपाणीचसमाच
म्यगृहेद्विजः॥ स्नात्वाशिरवांचवध्नीयाद्विराचम्यविशु
ध्यति॥ गृहेस्नानंयदाकृत्वास्नानवस्त्रोर्ध्वकंसृजेत्॥
अधोग्रेणनसपीड्यपारम्पारववोयथा॥ स्नानंकृत्वाचा
ईवस्त्रमुर्ध्वंउत्तारयेद्विजः॥ आर्द्रवस्त्रमधस्ताच्चेत्पुन
स्नानेनशुध्यति॥ अथसचैलस्नानं॥ श्वानमार्जार
कुकुटमघभांडरजस्वला॥ स्पृष्ट्वादेवलकंचैवसचैलं

५० ॥१३॥

१ मातापित्रसमुत्सृष्टस्त्रियामुत्सृष्टमयाचकः। देवार्चनपरो विप्रो वित्तार्थी वत्सरत्रयं। सर्वे देवलको नाम हव्यकव्येषु वर्जयेत्॥ चितिं च चितिकाष्ठं स्नानमाचरेत्॥ अथान्यखातानि॥ ततः कूपस्नानं॥ असंजैः खानिताः कूपास्तडागादितथैव च॥ तेषु स्नात्वा च पीत्वा च पंचगव्येन शुध्यति॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैवांत्यजातयः॥ एभिस्तु खानिताः कूपाः स्नानं तत्र न कारयेत्॥ पंचपिंडाननुद्धृत्य न स्नायात्परखातिषु॥ स्नायान्नद्यां देवखातेह्रदेषु च सरस्सु च॥ अथ नदीरजोदोषः॥ सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः॥ तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः॥ योगीश्वरः॥ रजोदुष्टासु न स्नानं वर्जयेन्नद्यादिषु द्विजः॥ क[illegible]थितं रजस्तासां संध्योपास्तिं च पार्वणं॥ गंगा च यमुना चैव प्लक्षजाता च सरस्व

स्मा

यूपं चांडालमेव च। स्पृष्ट्वा देवलकं चैव सचेलस्नानमाचरेत्॥

६१०

१४

३०

ती॥ रजस्सानाभिभूयंतयेचान्येनदसंज्ञका:॥ अत्रविशे
षमाह॥ व्याघ्रपाद:॥ उपकर्मणिचोत्सर्गेत्रितस्नानेतथैव च
चंद्रसूर्यग्रहे चैवरजोदोषोनविद्यते॥ अंभाविकूपवापी
नामनपायभूत्तांव्रजेत्॥ रजोदोषोपियसिन्नामभोगो प
नविद्यते॥ अस्थिचर्मादिपुल्कतुरखरश्वानादिदूषितं॥
उद्धरेदुदकंसर्वंशेषंधनंपरिमार्जनं॥ धनु:सहस्राण्यष्टौ
चगतिर्यासांनविद्यते॥ नतानदीशब्दवहागर्त्तास्ता:
परिकीर्त्तिता:॥ गर्त्तानांसर्वदा चैवरजोदोषोनविद्यते॥
तत्रस्नानंप्रकुर्वीत भार्गवस्यवचोयथा॥ कुशाविधि:॥ ॥१५॥
स्मृत्यर्थसारे॥ कुशा:काशायवाहूर्वाउशीराश्चसकुंदरा:॥

गोधूमा व्रीहयो मुंज्ञा दश दर्भाः प्रकीर्त्तिताः ॥ नभोनभ
स्यदर्शे तु शुभान्दर्भान्समाहरेत् ॥ अयातयामास्ते दर्भा
नियोज्याः स्युः पुनः पुनः ॥ हस्तपक्ष चतुर्दश्यामानीतव्याकु
शाद्विजैः ॥ अकालिकास्तथा शुद्धा अत ऊर्ध्वं विगर्हिताः ॥
स्नात्वा शुच्चोदर्भदिशो शुचिर्भुत्वा समाहितः ॥ प्राणाना
यम्य संकल्प्य कुशोत्पाटनमारभेत् ॥ प्रणवेनैव संग्रह्य
चत्वायदिश्ये यत्नतः ॥ दिग्गेवत्तानां मंत्रेण चतुर्दिक्षु क्षि
पेत्कुशान् ॥ विरिंचिना सहोत्पन्न परमेष्ठी निसर्गज ॥ नु
द सर्वाणि पापानि दर्भ स्वस्ति करो मम ॥ हुं फट्कारेण मं
त्रेण सकृच्छित्वा समुद्धरेत् ॥ अछिन्नाग्राह्य शुष्काग्राः पि

ध० प्रदी

१५

त्रेतुहरिताः कुशाः ॥ अंगिराः ॥ अहन्यहनि कर्मार्थं कुशा
सादः प्रशस्यते ॥ न पुर्वे धृत कुशा भोग्या श्चैवोत्तरे कुशाः ॥
॥११॥ मासिमास्युध्धृत कुशा मासिमास्येव चोदिताः ॥१२॥
पित्र्यसेषु सर्वेषु कुशा ग्राह्याः समाहिता ॥ दूर्वाश्च हरिता
सदा ग्राह्याः सर्वेषु शुभकर्मसु ॥१३॥ तथा च सत्रे ॥ अग्र
छिन्नाश्चाबलंतगर्भाः प्रादेशमात्रौ कुशौ नानातयो रित्ति ॥
तथा च कारिकायां ॥ अनंतरस्तरूलौ यौ तु कुशौ प्रादेशसं
मितौ ॥ अनखच्छेरिनो स्त्रौ वैतौ पवित्राभिधायकौ ॥ अ
थानिषिद्धानाह ॥ शंखः ॥ येषांतं गर्भिताः भर्यिच्छिन्ना ॥१५॥
नखैस्तथा ॥ कथिता नग्निदग्धांश्च कुशान्यत्नेन वर्जये

३ नोत्तरोत्तरमासेषु च कर्म — जिरसे जितः ॥ प्राप्ता सासे ... तान् ... र्तो
... दकर्म ... ॥ कुशा ... व ... कौ शास्यु: का शाः कु

त्॥ चित्तौ ते येषु ये दर्भा ये दर्भा यज्ञभूमिषु॥ स्तराभ्यासन पिं

प

डेषु दर्भांस्तु विवर्जयेत्॥ स्मृत्यर्थसारे॥ यैः दत्तः पिंड निर्वा

पः श्राद्धं वापि तत्र तर्पणं॥ विण्मूत्रादिषु ये दर्भास्तेषां सांगो

विधीयते॥ ३॥ अग्रचेता॥ अमायां तु न खछिद्यात्कुशांश्च

समिधस्तथा॥ सर्वथावस्थिते सोमे हिंसया ब्रह्महा भ

वेत्॥ तथा च सोमोत्पत्तौ॥ वनस्पतिगते सोमे यस्तु हिं

स्याद्वनस्पतीन्॥ घोरायां भ्रूणहत्यायां युज्यते नात्र संशा

यः॥ अयं निषिद्धो यर्थछेदनकर्मांगछेदने नैव दोषः॥ त

था च ज्ञा वाच्छिराह॥ कुशं गृछ्छा कं च पुष्पाणि गवार्थं च

तथा आरिकं॥ निषिद्धे पि च गृह्णीयादमावास्याह्नि द्विजः॥

१६

मनुः॥ आसद्दिने कर्त्ता दर्भांगच्छेत्तु दक्षिणांप्रवणान्दर्भांसमू
लानाहरेच्छुचिः॥ पराशरः॥ समित्पुष्पकुशादीनि श्रोत्रियः
स्वयमाहरेत्॥ शूद्रानीतैः क्रयक्रीतैः कर्म कुर्वन्व्रजत्यधः॥
अथ पवित्रलक्षणं॥ स्मृत्यर्थसारे॥ चतुर्भिर्दर्भपिंजूलैर्ब्रा
ह्मणस्य पवित्रकं॥ एकैकंन्यूनमुद्दिष्टं वर्णे वर्णे यथाक्र
मं॥ सर्वेषां वा भवेद्वाभ्यां पवित्रं ग्रंथितं नवा॥ त्रिभिः शां
तिके कार्यं पौष्टिके पंचभिस्तथा॥ चतुर्भिश्चाभिचा
रे स्यान्निःकामे रितिके वचनं॥ छंदोगभौ दक्षिणे हस्ते सव्ये
त्रीन्नासनेसहृत॥ हेमाद्रौ विरोधउक्तः॥ पंचभिः पौ
ष्टिके चैव चतुर्भिर्यज्ञकर्मणि॥ तिसृभिः पितृयज्ञे च

र्भै

॥१६॥

द्वौ दर्भौ निसकर्मणि ॥ श्राद्धे याद्याः स्त्रयः साग्राः कुश्याःस्युः
षोडशं गुला ॥ द्विमूलमेकमूलं कुर्यापवित्रं वायमेकतः ॥
घंगुलं मूलवलयं ग्रंथिरेकांगुलं तथा ॥ चतुरंगुलमग्रं स्या
स पवित्रस्य मानक ॥ स्नाने दाने जपे यज्ञे स्वाध्याये नित्य
कर्मणि ॥ सपवित्रो सदर्भो वा करो कुर्वीत नान्यथा ॥ उभे
यत्र स्थितैर्दर्भैः समावामतियो द्विजः ॥ सोमपानफलं त
स्य भुक्ता यज्ञफलं भवेत ॥ ग्रंथिर्यस्य पवित्रस्य न तेनाच
मनं चरेत ॥ आचमे घस्नमेग्हा लाययथाछिन्नं तथैव सः ॥
ब्रह्मयज्ञजपे होमे ब्रह्म ग्रंथिर्विधीयते ॥ भोजने वर्तुलं स्यै
श्राद्धं मेषधर्मा विधीयते ॥ सपवित्रः सदर्भो वा कर्मा

५० ॥१८॥ पा॰ गौ

१०

गान्धमन्नं चरेत्॥ नोच्छिष्टं तु पवित्रं तु भुक्ते। च्छिष्टं तु वर्जये
त्॥ यथा वज्रं सुरेंद्रस्य शूलं हस्ते हरस्य च॥ चक्रायुधं य
था विष्णोरेवं विप्रकरे कुशः॥ अथ सुवर्णादि पवित्राणि॥
योगी॥ हैमं पवित्रं ताम्रं वा राजतं हेममेव च॥ विभूषाद्दक्षि
णे पवित्रं चोत्तरोत्तरं॥ याज्ञवल्क्यः॥ अनामिकायां धृतं है
मं तर्जन्यां रौप्यमेव च॥ कनिष्ठिकायां धृतं खड्गं तेन पूतो
भवेन्नरः॥ तर्जन्यां विभृयाद्रौप्यं स्वर्णं चोपकनिष्ठया॥
गृहस्थः कर्णयोश्चैव शुभे रौक्मे च कुंडले॥ उत्तरीयं योग

॥१८॥

पट्टं तर्जन्यां रौप्यमेव च॥ कनीयसा पवित्राणि [illegible] न धार्य
मिति कौशिकः॥ पादुके चोत्तरीयं च तर्जन्यां रौप्यधारणं॥

न धारयेत्स पित्ता ज्येष्ठे भ्रातरि जीवति ॥ ताते च भ्रातरि ज्ये
ष्ठे यस्य चैव तु जीवति ॥ न तस्य मोनं तज्जन्या रजतस्येव धा
रणं ॥ पादुकारोहणं चैव योगपट्टं तथैव च ॥ न जीवत्पितृ
कः कुर्याद्दृया श्राद्धं तथैव च ॥ १६ ॥ अथ यज्ञोपवितं ॥ भृ
गुः ॥ उपवीतं बटोरेकं द्वे तथे[illegible]तरेयोः स्मृते ॥ एकमेव
यतीनां स्यादिति धर्मो व्यवस्थितः ॥ यज्ञोपवीते द्वे धा
र्ये श्रौते स्मार्ते च कर्मणि ॥ तृतीयमुत्तरीयार्थे वस्त्राभा
वे तदिष्यते ॥ पराशरः ॥ रंध्रादि नाभिपर्यंतं ब्रह्मसूत्रं
पवित्रकं ॥ स्कनेरोगप्रवृत्तिः स्यादधिके धर्मनाशनः ॥
आयुष्कामः सदा कुर्याद्बहु यज्ञोपवीतकं ॥ पंचभिः पुत्र

मनुः

कामस्याद्धर्मकामस्तथैव चौ॥ द्वन्द्वाष्टौ वा गृहस्थस्य च
त्वारि वनवासिनः॥ एकैकमुपवीतं च यतिनो ब्रह्मचारि
णः॥ यज्ञोपवीतेनैकेन जपहोमादिकं कृतं॥ तत्सर्वं वि
लयं याति पितॄणां नोपतिष्ठति॥ पतितं त्रुटितं वापि
ब्रह्मसूत्रं यदा भवेत्॥ नूतनं धारयेद्विप्रः स्नानसंकल्प
पूर्वकं॥ यज्ञोपवीतमेकैकं प्रतिमंत्रेण धारयेत्॥ आच
म्य प्रतिसंकल्प्य धारयेन्मनुरब्रवीत्॥ एकमंत्रेक संक
ल्प्य धृत्वा यज्ञोपवीतकं॥ एकस्मिन् त्रुटिते सर्वं त्रुटितं ना
त्र संशयः॥ यज्ञोपवीतमजिनं मौंजीदंडं च धारयेत्॥ न
ष्टे भ्रष्टे नवं धृत्वा नष्टं चैव जले क्षिपेत्॥ यज्ञोपवीति व

॥१८॥

द्धार्यं वासः सकलकर्मसु ।। सदैव ज्ञोपवीतेन च धीयाच्छ्रा
द्धकर्मणि ।। मनुः ।। कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं
त्रिवृत् ।। शाणसूत्रमयं राज्ञो वैश्यस्याविकसूत्रकं ।।
स्कांदे ।। उपवीतं क्रमेण स्यात्कार्पासं शाणमाविकं ।।
त्रिवदूर्ध्ववृतं तच्च भवेदायुर्विवृद्धये ।। उच्छिष्टं तोर
णं छिन्नं विक्रीतं विधवाकृतं ।। भुक्त्वोत्तरेण न ध्याये
त्स सूतं तु न धारयेत् ।। विधवारचितं सूत्रमनध्यायेकृ
तं च यत् ।। त्रिच्छिन्नमप्यधोयातं भुक्त्वा निर्मितमुत्सृजे
त् ।। संग्रहो ।। ऊर्ध्ववृतमधोवृत्तं पुनरूर्ध्ववृतं तथा ।।
। एतद्यज्ञोपवीतं स्यात्सैकाग्रंथिरिष्यते ।। तैत्राः मैत्राः

धे०॥

प्र०

कठाः कण्वाश्चरकाश्चाजसनेयकाः ॥ कंठादुत्तीर्य सूत्रं तु कु

र्युर्वै क्षालनं द्विजः ॥ अयं नित्यविधिः ॥ बह्वृचाः सामगाः

श्चैव ये चान्ये यजुषास्तथा ॥ कंठादुत्तीर्य सूत्रं तु पुनः संस्का

रमर्हति ॥ अभ्यंगे चोदधिस्नाने मातापित्रोर्मृतेहनि ॥

कंठादुत्तीर्य सूत्रं तु कुर्याद्वै क्षालनं द्विजः ॥ अथ तिलकं ॥

ललाटे तिलकं कुर्यान्मृदा वापि च भस्मना ॥ तदभावे तु

तोयेन चंदनेनापि वा द्विजः ॥ स्मृतिसारसमुच्चये ॥ ऊर्ध्व

पुंड्रं द्विजातीनां अग्निहोत्रसमो विधिः ॥ श्राद्धकाले तु

संप्राप्ते कर्ता भोक्ता तु तत्त्यजेत् ॥ ऊर्ध्वपुंड्रं मृदः सौम्यं

ललाटे यस्य दृश्यते ॥ स चांडालोपि शुद्धात्मा पूज्य एव

॥(१९)॥

॥१९॥

नसंस्थाय ॥ ब्रह्मघ्नो वाप्य[illegible] गोघ्नो वाहेतुक सर्वपापहृत् ॥
गोपीचंदनसंपर्कान्मुक्तो भवति तत्क्षणात् ॥ दशांगुलप्र
माणं स्यादुत्तमोत्तममुच्यते ॥ नवांगुलं मध्यमं स्यादष्टां
गुलमतः परं ॥ सप्तषड्भिः पंचभिः पुंड्रं मध्यमं त्रिविधं स्मृ
तं ॥ २५ ॥ ऊर्ध्वपुंड्रं मृदा कुर्यात्तिर्यक्चैव तु भस्मना ॥ चंदनेनो
भयं कुर्यादन्यथा नरकं व्रजेत् ॥ मध्यांगुलीत्रयेणैव धार
येदूर्ध्वपुंड्रकं ॥ भुवमारभ्य यत्नेन ब्राह्मणः सर्वकर्मसु ॥
भागवतानामंगुलीनियमः ॥ अंगुष्ठः पुष्टिदः प्रोक्तो य
शस्या मध्यमा भवेत् ॥ अनामिका श्रियं दद्यान्मुक्तिंद

=९ ललाटे तिलकं कुर्यात् कुर्यात् ... तर्पणं च

घास्रदेशिनी॥ दर्भपाणिन कुर्वीत भ्रूमध्यादि प्रदीपवत्॥
श्रीकामः पुष्टिकामो वा धारयेच्छ तिलकं च वेत्॥ स्नात्वा पुंड्र
म्रदा कुर्याद्धोमं हुत्वा तु भस्मना॥ अभ्यंगोत्सवकाले तु क
स्तूरीचंदनादिना॥ चतुस्त्रिविधं गुरूं पुंड्रं कानिष्ठं त्रिवि
धं स्मृतं॥ जपो होमस्तथा दानं स्वाध्यायं पितृतर्पणं॥
व्यर्थं भवति तत्सर्वं ऊर्ध्वपुंड्रं विना हृतं॥ भागवतविरो
धमेतत्॥ स्मार्त्तविषये तु सविरोधः॥ स्वाध्यायजपहो
मादिसंध्यादानादिकं च यत्॥ ऊर्ध्वपुंड्रं विना कुर्यात्तत्स
र्वं निष्फलं भवेत्॥ ऊर्ध्वपुंड्रं त्रिपुंड्रं चा ब्राह्मणः कर्मक ॥२०॥
र्मकर्तृभिः॥ वर्जयेत्तिलकं भाले श्राद्धे चैव तु तर्पणे॥

२

अभ्यंगे सूतके चैव विवाहे पुत्रजन्मनि ॥ मांगल्येषु च सर्वे
षु न धार्यं गोपिचंदनं ॥ ऊर्ध्वपुंड्रं त्रिपुंड्रं वा चंद्राकारमथापि
वा ॥ श्राद्धकर्त्ता न कुर्वीत यावत्पिंडान्न निर्वपेत् ॥ ऊर्ध्वपुंड्रं
सदा कुर्यात् श्रौते स्मार्ते च कर्मणि ॥ कर्त्ता वाप्यथवा भोक्ता
न कुर्याच्छ्राद्धकर्मणि ॥ नैव तिर्यक्कदा कुर्यादूर्ध्वपुंड्रं च भ
स्मना ॥ चंदनेनोभयं कुर्यादिति तन्मनुरब्रवीत् ॥ त्रिपु
ड्रं सुरविप्राणां वर्त्तुलं नृपवैश्ययोः ॥ अर्द्धचंद्रं तु शूद्राणां
अन्येषामूर्ध्वपुंड्रकं ॥ अथ भस्मधारणं ॥ ब्राह्मणानां
नृपाणां च भस्ममिश्रं च चंदनं ॥ नेत्रयुग्मप्रमाणं तु त्रि
पुंड्रं धारयेद्द्विजः ॥ रत्नावल्यां ॥ मध्यमानामिकांगुष्ठैर्ल

त्रिपुंड्रं परमं पुण्यं जन्मव्याधि कुशित्यात्मकं ॥ ये ज्ञाता राक्षसाः प्रेताः ये चान्ये क्षुद्रजंतवः ॥

ध०

लाटे यस्त्रिपुंड्रकं ॥ तत्रिपुंड्रं भवेद्यस्तु महापातकनाशनं ॥
स्मृतिसारे ॥ अशुचिर्वा विनाचारो मनसा पापमाचरन् ॥

॥२९॥

शुचिरेव भवेन्नित्यं त्रिपुंड्रस्य च धारणात् ॥ नारदः ॥ त्रि
पुंड्रधारणं दृष्ट्वा पलायंति न संशयः ॥ तस्मात्सर्वप्रयत्ने
न त्रिपुंड्रं धारयेत्सुधीः ॥ विष्णुः ॥ यस्य पङ्क्त्यां द्विजो भुंक्ते शि
वभक्तस्त्रिपुंड्रधृक् ॥ स तां पङ्क्तिं पुनात्येव सकलां च तु
रानन ॥ भक्तिर्यस्य भवेद्यस्मिन् मृदि वाप्यथ भस्मनि ॥
तदेव धारयेद्विद्वानिति वै मुनयो विदुः ॥ न पादुकस्थो
नादर्शे न जले तु च लोकयन् ॥ न प्रावृतः शिराः कुर्या
त्तिलकं धर्मसाधनं ॥ ८ ॥ अथ संध्याकालः ॥ उत्तमता

प्र०

॥२९॥

रक्तोपेता मध्यमा लुप्ततारका ॥ अधमा सूर्यसंयुक्ता प्रातः
संध्या त्रिधा स्मृता ॥ उत्तमा सूर्यसंयुक्ता मध्यमा लुप्तभा
स्करा ॥ अधमा ऋक्षसंयुक्ता सायंसंध्या त्रिधा स्मृता ॥ अ
होरात्रस्य यः संधिः सूर्यनक्षत्रवर्जितः ॥ सा तु संध्या समा
ख्याता मुनिभिस्तत्त्वदर्शिभिः ॥ संध्योतमात्तीयारे पंच
धांशो दिनस्य तु ॥ माध्यान्हिकी तदूर्ध्वं वा पूर्वं वा स्याद्दिवे
व हि ॥ संध्याकाले तु संप्राप्ते संध्यां नैवमुपासते ॥ जीवमा
नो भवेच्छूद्रो मृतःश्वा चैव जायते ॥ काले तु वंदिता संध्या
स्वर्गमोक्षप्रदायिनी ॥ अकाले वंदिता संध्या सा च वंध्या
वधूरिव ॥ काललोपे प्रायश्चित्तं ॥ संध्याकाले त्वतिक्रांते

२ —देवापि द्विजविप्राणां कार्ये समतिसंस्थिते॥ संध्याविहीने दोषोक्तीतपस्वकर्मणः

धं० प्र०

स्नात्वाचम्य यथाविधिः॥ त्रपेद् दृष्ट्वा तं देवीं ततः संध्यां
समाचरेत्॥७॥जमदग्निः॥ एकाहं समतिक्रम्य ग्रसा

॥२२॥

द्दुहृतं यदि॥ अहोरात्रोषितो भूत्वा गायत्र्याश्चायुतं ज
पेत्॥ राष्ट्र भंगो नृपक्षोभे रोगार्ते सूतके पि च॥ संध्या
वंदन विच्छित्तिर्न दोषाय कदाचन॥ अथ संध्याविधिः॥
कारिका॥ अन्यच्चाहरहः कृत्सं संध्योपासनमुच्यते॥
ग्रामाद्बहिरपां तीरे उपविश्यैव स द्विजः॥ आचम्य मार्ज
नाद्यं न्यस्य सुक्तं च करोस्य थ॥ रोगो वा वारे तथा पाने स्व ॥२२॥
ष्टास्य ष्टो च पर्वणि॥ पौराणाचमनं कुर्यान्नाम भिः के

२ शवाद्यविधिनाचैव संध्या कर्म समाचरेत्॥ =

शवादिभिः॥ संध्यायांकर्मकालेचस्मृतेराचमनंस्मृतं॥
ब्रह्मयज्ञेतुवेकुर्याच्छ्रौतेमाचमनंद्विजः॥ गोकर्णहस्तहस्ते
नमाषमात्रंजलंपिबेत्॥ न्यूनंचमधिकंपीत्वासुरापा
नसमंभवेत्॥ अंगुष्ठाग्रेसमाकुंच्यमध्यमामध्यपर्वणि॥
गोकर्णतद्धिविज्ञेयंसर्वेष्वाचमनेष्विह॥ स्मृत्यंतरे॥ सं
हतांगुलिहस्तेनगृहीत्वांबुवीक्षितं॥ मुक्तांगुष्टकनि
ष्ठाभ्यांत्रिःपिबेद्ब्रह्मतीर्थतः॥ शीतलंनिर्मलंचांबुमधु
रंक्षारवर्जितं॥ ग्राह्यमाचमनेस्नानेदैवेपित्र्येचकर्मणि॥
अथपुराणाचमनं॥ केशवादित्रिभिःपीत्वा॥ द्वाभ्यां
प्रक्षालयेत्करौ॥ गंडूषौष्ठौद्विसंमृज्येकेकंपाणिपाद

द्वाभ्यामोष्ठौच

॥२३॥

घोः॥ मृद्भिश्चैकं वचस्यैकं नासाक्ष्णोः कर्णयोर्द्वयोः॥ बा
केर्नाभौ च हृद्द्ये मृद्भिश्चैकं विनिक्षिपेत्॥ प्रणवपूर्व
तन्नाम चतुर्विंशतिसंख्यया॥ स्वाहांतं प्राशयेद्वारि नमो
तं स्पर्शयेत्तथा स्मृत्याचमनं॥ तथाच स्मृतिः॥ संहतांगु
लिभिस्तोयं गृहीत्वा दक्षिणेन तु॥ मुक्तांगुष्ठकनिष्ठेन त्रिः
पिबेद्ब्रह्मतीर्थतः॥ प्रक्षाल्य हस्तौ पीत्वाथ सकृदोष्ठाव
तः परं॥ संहतांगुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखं॥ ध्यत्वा
करावधिस्पृशेत्संहतांगुलिभिर्जलं॥ आभिर्वामकरे
सिंच्य ताभिः पादौ च संस्पृशेत्॥ मध्यमध्येन जलं स्पृ ॥२३॥
ष्ट्वा स्पृशेन्नासादिकान्क्रमात्॥ अंगुष्ठेन प्रदेशिन्या

घ्राणं पश्चादपस्पृशेत् ॥ अंगुष्ठानामिकाभ्यां च चक्षुः
श्रोत्रे च यथाक्रमं ॥ अंगुष्ठोपकनिष्ठाभ्यां पश्चादुपस्पृ
शेत् ॥ तलेन हृदयं स्पृष्ट्वा स्पृशेदंगुलिभिः शिरः ॥ अं
गुष्ठाग्रैर्दक्षिणादि बाहू स्कन्धद्वयं स्पृशेत् ॥ अनेन वि
धिवद्विप्रः कुर्यादाचमनं सदा ॥ अथ श्रुत्याचमनं ॥ दे
व्याः पादैस्त्रिभिः पीत्वा वाल्लिंगैर्नवभिः स्पृशेत् ॥ सप्त
व्याहृतिभिश्चैव शिरो बाह्वोस्तु संस्पृशेत् ॥ आदावं
ते च संध्यायां द्विर्द्विराचमनं स्मृतं ॥ तथैवार्घ्यप्रदा
नांते मध्ये मध्ये सकृत्सकृत् ॥ अथ प्राणायामः ॥

॥२५

स्मसर्यसारे ॥ दक्षिणेरेचनंकुर्याद्वामेनपूरितोदरं ॥
कुंभकेनजपः कुर्यात्प्राणायामः सउच्यते ॥ पंचांगुलि
भिर्नासाग्रपीडनंप्रणवाभिधं ॥ मुद्रेयंसर्वपा
पघ्नी वानप्रस्थगृहस्थयोः ॥ कनिष्ठानामिकांगुष्ठै
र्नासाग्रस्यनिपीडनं ॥ ॐकारमुद्रासाप्रोक्तायते श्व
ब्रह्मचारिणः ॥ याज्ञवल्क्यः ॥ गायत्रीं शिरसासा
र्द्धं जपेद्व्याहृतिपूर्वकं ॥ त्रिः पठेदायतप्राणः प्राणा
यामः सउच्यते ॥ दशप्रणवसंयुक्तां गायत्रीं सशिर ॥२४॥
सासह ॥ त्रिः पठेदायत प्राणः प्राणायामः सउच्य

ते॥ सं[illegible]कं प्राश्य[illegible]॥ आद्यावं
तेत्वगायत्र्या प्राणायाम स्त्रय स्त्रयः॥ अथ मार्जनं॥
श्रेणे न ककारिकायां॥ अथ संध्यासु पादिशेषु इति संकु
ल्यमार्जयेत्॥ तिसृभिर्मार्जनं कुर्यादापोहिष्ठा कुशो
दकैः॥ पादे पादे क्षिपेन्मूर्ध्नि प्रति प्रणवसंयुतं॥ आत्मा
नं प्रणवेनैव परिषिंच्य जलैः सह॥ कुर्यात्सप्रणवैः
पादैर्मार्जनं तु कुशोदकैः॥ यस्य क्षयाय इति जलं संकु
ल्यं च क्षिपेदधः॥ स्पृष्ट्वा हस्तेन वामेन ततं तं नद्यादिके
षु च॥ पाणिना दक्षिणेनैव मार्जयेत्सकुशेन तु॥ पा
त्रस्थितोदके नैव वामहस्तोदकेन वा॥ गृहे तु मार्जन

नं कुर्यान्नान्यथेत्यब्रवीन्मनुः॥ कुर्यान्नवारिपात्राणि
संध्याकाले गृहे द्विजः॥ मार्जने स्नाने चार्घ्ये तथैवा
चमने सदा॥ सूर्यश्चेत्यनुवाकेन प्रातःकाले पिबेद
पः॥ अग्निश्चेत्यनुवाकेन सायंकाले पिबेदपः॥ आ
पः पुनंतु मध्याह्ने मंत्राचमनमाचरेत्॥ विस्रदर्भा
नाचम्य कुशपाणिश्च मार्जयेत्॥ प्रणवेन च व्याहृत्या
गायत्र्या चैव मार्जयेत्॥ आपो हि ष्ठेति नवभिर्ऋग्भि
र्मार्जनमाचरेत्॥ ऋतं चैकाम्नतं वापि द्रुपदां वा जपे
दृचं॥ दक्षिनासापुटेनैव पापात्मानमपोहरेत्॥ त
ज्जलं नावलोक्याथ वामभागे क्षितौ क्षिपेत्॥ आ

चम्यदर्भान्विसृज्य धृत्वादर्भानतः परं ॥ ३६॥ अथार्घ्य
दानं॥ पाणिभ्यांजलमादायगायत्र्याचाभिमंत्रितं॥
रवेरभिमुखस्तिष्ठंस्त्रिरूर्ध्वंसंध्ययोः क्षिपेत्॥ द्वौपा
दौतुसमौकृत्वापूरयेदुदकांजलिं॥ गोशृंगमात्रमुद्धृ
त्यजलमध्येजले क्षिपेत्॥ ईषन्नम्रः प्रभाते [illegible] तुम
ध्याह्ने ऋजुसंस्थितः॥ उपविश्यतुसायाह्नेजलेष्व
र्घ्यं विनिक्षिपेत्॥ इत्यापस्तंबविषयं॥ कालातिक्रम
णेयस्तु त्रिसंध्यमपिसर्वदा॥ चतुरर्घ्यंप्रदातव्यंगाय
त्र्याशिरसासह॥ तर्जन्यंगुष्ठसंयोगेराक्षसीमुद्रिका
भवेत्॥ यादृग्दातितयाचार्घ्यं तत्तोयंरुधिरंभवेत्॥

॥२६॥

अ सावादित्य मंत्रेण सोदके नैव पाणिना ॥ प्रदक्षिण
मुपश्चाज्य त्वाचमेत्संध्ययोर्द्वयोः ॥ मंदेहनां विनान्तोनि य
क्षिपेत्तु सत्रिलांजलीन् ॥ प्रायश्चित्तार्थमाचम्यमुच्य
ते दैत्य सहस्रया ॥ अथ आसनानि ॥ वंशासने दरिद्रः स्या
त्पाषाणे व्याधिसंभवः ॥ धरण्यां दुःखसंभूति दौर्भा
ग्यं दारुकासने ॥ तृणासने पत्रोहानिः पल्लवे चित्तवि
भ्रमः ॥ कृष्णाजिने ज्ञान सिद्धिर्मोक्षश्री व्याघ्रचर्मणि ॥
अभिचारे च नीलं स्यात्कंबलो व्याधिकर्मसु ॥ श्वेतव
स्त्रेयन्त्रा वृद्धिः सर्वार्थः चित्रकंबले ॥ सायणीये ॥ ॥२६॥
भिन्नासनं योगपट्टं तथैव मृगचर्म च ॥ कृष्णाजिनं च

यत्नेन वर्जयेत्सूत्र वाक्सदा ॥ प्राणायामत्रयं कुर्यादुपवि
ष्टः कुशासने ॥ ऋष्यादितत्स्मरणं ज्ञात्वा रुद्रप्रोक्तेन मार्ग
तः ॥ न्यासं कुर्याद्विधानोक्तं षडंगं वाथ शक्तितः ॥ मौ
नकः ॥ गायत्रीं संस्मरेद्धीमान् हृदि वा सूर्यमंडले ॥ क
ल्पोक्तलक्षणेनैव ध्यात्वाभ्यर्च्य ततो जपेत् ॥ प्रातस्ति
ष्ठं जपेद्देवीं सायं चैवोपविश्य च ॥ उपविश्य तु मध्या
न्हे जपकर्म समारभेत् ॥ [illegible] ॥ पूर्वसंध्यां जप
न्तिष्ठेत्सावित्रीं सूर्यदर्शनात् ॥ पश्चिमायां समासीनः
सम्यक् नक्षत्रदर्शनात् ॥ व्यासः ॥ प्रातर्मध्यान्हयो
स्तिष्ठन् गायत्रीं जपमारभेत् ॥ ऊर्ध्वजानुस्तु साया

न्हे ध्यानालोकनतत्परः ॥ कारिका ॥ अर्द्धास्तमित आ
दित्ये पश्चिमस्य थ उत्तमः ॥ भागस्तन्मुख आसीनस्सा
वित्री वाग्यतो जपेत् ॥ आतारकोदयादेवं प्रातः कर्म
तदिष्यते ॥ अर्द्धास्तमितनक्षत्रमंतरिक्षं यदा तदा ॥
आरभ्य प्राङ्मुखस्तिष्ठेज्जपन्नासूर्यदर्शनात् ॥ साय
मुक्ष्यति संध्यायाः साबुधे कीर्तितास्तदा ॥ प्रथमतः ॥
उपनयनकाले सायंसंध्यामुपक्रमेदित्यर्थः ॥ तथा
च शौनकः ॥ उपनीतो हि वृत्तं वै सायंसंध्यामुपक्रमे
दिति ॥ तथा च कारिकायां ॥ अहः शेषं ततस्तिष्ठेत्सा ॥२७॥
यं संध्यामुपास्यातेति ॥ अथ जपविधिः ॥ प्रातर्नाभौ

करोस्त्वामध्यान्हे हृदिसंस्थितं ॥ सायं जपतिनासा
ग्रेजपश्चत्रिविधः स्मृतः ॥ अंगुष्ठेनाभिकामूलं प्रदक्षि
णमतं द्विज ॥ मध्यमामध्यपर्यंतं गायत्रीजपमीरितं ॥
गायत्री वेदमूलत्वाद्वेदः पर्वसु गीयते ॥ पर्वभिस्तु जपेद्दे
वीं न मालाभिः कदाचन ॥ अंगुष्ठं मोक्षदं विंघातर्जनी
शत्रुनाशनी ॥ मध्यमा धनदा त्रां तिं करोत्येषा अनामि
का ॥ कनिष्ठा रक्षणी प्रोक्ता जपकर्मणि नाभने ॥ उष्णी
षी कंचुकी नग्नो मुक्तकेशो गलावृतः ॥ अपवित्रक
रश्चैव प्रलापं न जपेत्क्वचित् ॥ ॐकारपूर्वमुच्चार्य
भूर्भुवस्वःस्ततः परं ॥ गायत्र्या प्रणवश्चांते जपएष

॥२९॥

विधिस्मृतः॥ तिस्रो व्याहृतयः पूर्वं च यगोंकारसंयु
तः॥ पुनः संहृसं चोंकारं मंत्रस्याद्यंतयोस्ततः॥ वाचि
कारव्य उपांशुश्च मानसस्त्रिविधः स्मृतः॥ त्रयाणां
जपयज्ञानामश्रेयस्यादुत्तरोत्तरः॥ यदुच्चनीचस्वरितैः
शब्दैः स्पष्टपदाक्षरैः॥ मंत्रमुच्चारयेद्वाचा जपयज्ञं स
वाचिकः॥ शनैरुच्चारयेन्मंत्रं मंदमोष्ठौ प्रचालयत्॥
अपरैरश्रुतः किंचित्स उपांशुर्जपः स्मृतः॥ विधाय
दाक्षरश्रेण्या वर्णाद्वर्णं पदात्पदं॥ शब्दार्थचिंतनं
भ्यसः कथ्यते मानसो जपः॥ मानसः सिद्धिकामानां पु
त्रे कामउपांशुकः॥ वाचिको मारणे चैव प्रशस्तो ज
रमा

॥२९॥

पद्दरितः॥ वाचिकस्त्वेकरुव स्यादुपांशुं शतमुच्यते॥ सह
स्रं मानसं प्रोक्तं मन्वत्रिभृगुनारदैः॥ स्कन्दसूर्यसारे॥ ब्र
ह्मचारी गृहस्थश्च शतमष्टोत्तरं जपेत्॥ वानप्रस्थश्च य
तिश्चैव सहस्राद्धिकं जपेत्॥ शौनकः॥ अष्टोत्तरश
तं नित्यं अष्टाविंशतिमेव वा॥ विधिनादशकं वापि त्रि
कालेषु जपेद्द्विजः॥१५॥ अथ प्रदोषे जपसंख्या॥ आ
द्यप्रदोषदृष्टौ च गायत्री द्वादशसंख्यया॥ अष्टाविंशासन
ध्याये सुदिने तु यथाक्रमं॥ अथ जपस्थानं॥ गृहे जपं
समं विद्याद्गोष्ठे शतगुणं भवेत्॥ पुण्यारण्ये तथा
रामे सहस्रगुणितं तथा॥ अयुतं पर्वते पुण्ये नद्यां

॥५६॥

लक्षमुदाहृतं॥ कोष्टि देवालये प्राकुरनंतं विष्णुसन्निधौ॥
सूर्यस्याग्ने गुरोरिंदोर्दीपस्य च जलस्य च॥ विप्राणां च
गवां चैव सन्निधौ शस्यते जपः॥ अश्वथमूळमाश्रित्य
जपहोमसुरार्चनं॥ अक्षय्यफलमाप्नोति ब्राह्मणेन च
नंतथा॥ अथ निषेधः॥ पतितानां प्रजातीनां दर्शने भा
षणे श्रुते॥ क्षुते धौ वातगमने जृंभणे जपमुत्सृजेत्॥
प्राप्तावाचस्य चैतेषां प्राणायामं षडंगकं॥ कृत्वा सम्य
ग्जपेच्छेषं यद्वा सूर्यादि दर्शनं॥ अथ काम्यापरत्वान्मा
ळाविधिः॥ शंखाक्षमणयः श्रीदाः स्फटिकामोक्षदा
परः॥ पद्माक्षाः पुत्रिलक्ष्मीदा रुद्राक्षा भुक्तिमुक्तिदाः॥

पुत्रजीवभवाः पुत्रपशुधान्यसमृद्धिदाः॥ विद्रुमा वस्यधनदा सौभाग्यार्थाश्च मौक्तिकाः॥ पापक्षयांकुशमयाः कामदाः स्वर्णरौप्यजाः॥ प्रवाळमोक्तास्फटिके जपकोटिफलप्रदं॥ तुळसीमालिनायेन गालितं चाक्षयं भवेत्॥ रुद्राक्षमालिनाचैव स्यनंतफलमश्नुते॥ ८०॥ अथ रुद्राक्षधारणं॥ रुद्राक्षान्कंठदेशे दशनपरिंतान्मस्तके विंशतिर्द्वे षट्‌षट् कर्णप्रदेशे करयुगलगतान्द्वादशं द्वादशैव॥ बाह्वोरिंदोः कलाभिः पृथगपि गता नेकमेकं शिखायां वक्षस्यष्टाधिकं यः कलयति शतकं स स्वयं नीलकंठः॥ अथ संध्योपासनं॥ ३० नमः॥

५०

॥ प्रसंगतो मध्याह्नसंध्योच्यते ॥ आचार्यः ॥ कुर्यात्सिध्यात्रिकीं सं ३०

ध्यां ब्रह्मयज्ञादनंतरं ॥ संगवादूर्ध्वमेवाह्नेर्नस्रुर्दर्धा ॥ गधोपि ॥ वि

सायं प्रातरुपस्थाने कुर्यान्मंत्रैर्यथाक्रमं ॥ जातवेदस

इसे कात्तछंद्योरावली महे ॥ नमो ब्रह्मण इसे तैरुपस्थि ॥३०॥

त्वेदिरं प्रति ॥ उत्तमे चानुवाके न गायत्री च विसर्जये

त् ॥ उपस्थानं तु मध्याह्ने कुर्यात्सूर्यस्य संमुखः ॥ उदु

त्यमिति च वै चित्रं देवानामिसनेन च ॥ अथाभिवाद

नं ॥ आसपादोत्तथा भूमिं स्पृष्ट्वा संध्याभिवादनं ॥ न

क्षत्रं च तथा सूर्यं द्विजानप्यभिवादयेत् ॥ विश्वाद

र्शा ॥ पूर्वं नाम्नाभिवाद्यः पितृवद्दिव्यभवेत्ज्ञानदः

श्रोत्रियस्त्वच्यदाज्यायान् कनीयानपि भवति तद्वा ॥२०॥

मातुको वा पितृव्यः ॥ जुह्वन् वृद्धोपि वर्ज्यः कुरास

स्वामित्रः ॥ सवृद्धर्यं तु मध्याह्ने प्रक्षिपेत्कुसरस्त्र्या ॥ जा

लिलसमिसुष्पपाणिस्वयंवाशुद्धोधावंतुदक्यापतित
शटहृत्तघ्नानअरण्योपवासः ॥ स्मसर्थसारे ॥ ज्येष्ठं
वापिकनिष्ठंवासंध्यात्तेवाभिवादयेत् ॥ वर्जयेत्तुसु
तंत्रिाष्पंदोहित्रंदुहितापतिं ॥ नारायणाः ॥ नमेद्वृद्दम
धीरैंतौपदक्रमसमन्वितं ॥ सारल्यंब्राह्मणंसांगंक
निष्ठंवाभिवादयेत् ॥ नित्यंवेदमधीतारमध्यापयंत
मेवच ॥ अनधीतोनमस्कुर्याज्येष्ठोवापिकनीयसं ॥
वर्ज्यानाह ॥ वमंतंजृंभमाणंचकुर्वंतंदंतधावनं ॥ अ
भ्यक्तशिरसंस्नानंकुर्वंतंनाभिवादयेत् ॥ दूरस्थंजल
मध्यस्थंधावतंधनगर्वितं ॥ उन्मत्तंबधिरंमूकंअंधं

चनाभिवादयेत्॥२१॥अथोपासनविधिः॥तत्रेदं सूत्रं॥पाणिग्रहणादिगृह्यंपरिचरेदिति॥तत्रादौहोमकर्तृनाह॥होमेमुख्योयजमानःपत्नीपुत्रश्चकंन्यका॥ऋत्विक्शिष्योगुरुर्भ्राताभागिनेयःसुतापतिः॥एतैरेवकृतंयत्तुतद्धुतंस्वयमेवहि॥कार्यन्तरोधतः(कर्तास्वयंकर्तुंनशक्यते॥होमंकुर्यादिनान्योचेपूर्त्विक्कुर्त्तुरनुज्ञया॥यदिस्यात्सूतकंकर्तुःकुर्वीतान्यन्तरोपितान्॥अस्तमितेसायंजुहोस्कदितेप्रातरितिप्राहणं॥तथाचकारिकायां॥अथयस्मिन्विवाहाग्निरुत्सन्नोहन्तितस्यतु॥नसायंतनमारभ्यवह्निंपरिच

॥२२॥

॥२३॥

रेस्वयं॥निरौपासनं सायमारं भएं सिद्धिं॥ आन्हिका
चारे तु प्रातरग्न्यविधिर्लिखन्ने॥ उदिते जुहोतीति
श्रुतिः॥ तथा मनुः॥ कात्यायनः॥ लेखामात्रश्च दृश्येत
तरश्मिभिश्च समन्वित॥ उदितं तं विजानीयात्तत्र हो
मोविधीयते॥ शाकलः॥ अग्निसंरक्षणे यस्य प्रातिः
र्यदि न विद्यते॥ स भि धारोपयेदग्निं हस्तयोरथवा
पि च॥ संग्रहे॥ हस्ताद्धूर्ध्वं रविर्याति भुवं हित्वा न ग
च्छति॥ तावदेव दिवा काले प्रातस्त्वहदित्तहोमिनां॥
प्रातर्द्वादशनाड्यस्तु सायं तु नव नाडीकाः॥ होमत्रा

॥३२॥

कः समुद्दिष्टो मुनिभिः स्तत्वदर्शिभिः ॥ अथ स्थंडि
लादि ॥ इषुमात्रावरं सर्वत्र स्थंडिलमुपलिप्येति
सूत्रं ॥ द्वैगेन कोपीत्ति ॥ अरत्निमात्रं विज्ञेयमग्नेरा
यतनं शुभं ॥ श्रोते चोपासने वापि खातयोनिवि
वर्जितं ॥ मेखलाद्वितयं कार्यं रेखात्लग्नं तु बाह्य
तः ॥ बाह्याद्यंगुलविस्तारो भ्यंतरा चतुरंगुला ॥
बाह्ये षडंगुलोत्सेधा भ्यंतरा द्वादशांगुला ॥ वि
स्तारेण तु कर्तव्या सम्यक् लक्षणा दृढा शुभा ॥ अ
न्यपक्षः ॥ नित्यहोमे तु कुंडं स्यान्मेखलात्रयसं

॥३३॥

युक्तं भ्रमेरूर्ध्वं प्रकुर्वीत चतुर्विंशांगुलं शुभं ।। मेखला
चोन्नता कार्या त्वेकैका चतुरंगुला ।। ध्यंगुला विस्त
तैकैकाखातस्याद्वादशांगुला ।। गृह्याग्निरक्षणार्था
त्कु विषये ।। शाकल्यः ।। अग्निसंरक्षणेयस्य शक्तिर्य
दि न विद्यते ।। समिधारोपयेदग्निं हस्तयोरथवापि
वा ।।१३।। अथ प्रयोगः ।। लौकिकाग्निं प्रतिष्ठाप्य कुं
डे वा स्थंडिले पि वा ।। पालिस्थं वा समित्स्थं वा वह्निं
संयोजयेत्ततः ।। अथ प्रसवरोहेति मंत्रेणाग्निं समि
त्स्थितं ।। पालिस्थं वाप्यनेनैव निदध्याल्लौकिकेन

द्धे ॥ अथ विधिसुसंकल्प्य कुर्यात्स्थानं हविर्भुजः ॥
पर्युक्ष्याग्निं परिस्तीर्य पर्युक्ष्य च ततः परं ॥ पयः प्रस्र
स्तिषु त्वेवं संस्कुर्यादग्निहोत्रवत् ॥ दर्भेलसवं ज्वल
येदपक्वं पक्वमेव च ॥ अधिश्रितेस्रुवेणाप: प्रतिषिं
चेन्नवापि च ॥ पुनस्त्रिज्वलतानेन परिहृत्य प्रहृस
तत् ॥ पयो यवागुः सर्पिश्च ह्योदनं दधि तंदुलाः ॥ सो
मस्तैलमपो व्रीहि द्विदलं तितिलायवाः ॥ पय आदी
नि चत्वारि विदुः पक्वानि याज्ञिकाः ॥ दध्यादीनाम
पक्वानां नाधिश्रवणमुच्यते ॥ २० ॥ स्मसर्थसारे ॥ ॥२२॥

प्रियंगुव्रीहिश्यामाकानीवाराश्चतथाययवाः॥या
वनालश्चगोधूमाउपासनेशुभावहाः॥नालिश्या
माकनिवारागोधूमाव्रीहयोयवाः॥एतेषांतंदुला
होम्यायावनालाप्रियंगवाः॥प्रियंगवःशालयश्च
गोधूमाव्रीहयोयवाः॥स्वरूपणेवहोम्यास्तुःस्वरू
पेणैचवैतिलाः॥कारिका॥व्रीहिणांचयवानांचच
तुःषष्टिरथाहुतिः॥तिलानांतुतदर्धंस्यात्तदर्धंस्या
द्धृतस्यतु॥इदंवेहविःस्तुचेलेवपालिनाकधिनेहविः॥
जुहुयादग्नयेस्वाहास्तुसमिद्धहुताशने॥अथशाक

श्री

लः॥ अद्भिः प्रक्षालितानां भ्रांतंडुला नाग्नौ हुता
न्॥ जुहुयादग्नये स्वाहा स्त्वर्याय प्रातरेव च॥ प्र्या
त्वाशाब्दं चतुर्थ्युक्तं प्रजापतये इत्स्य॥ स्वाहाकारे
णजुहूयात्ततः परिसमूहनं॥ औपासनं तु जुहुया
दंगुलीनां च वामतः॥ वैश्वदेवेन यथा होमे ष्वाहुती
रग्नतो हुनेत्॥ पयसा ज्येन वा प्रातस्तैर्नैवे साह
वतिहरेत्॥ कर्व मंत्रस्तु सूर्याय स्वाहेस्त्यत्स मभ
वेत्॥ शौनकः॥ आग्नयै श्चैव सोर्यै श्च प्राजापत्ये

स

ननिसद्रा:॥सौरं वैश्वानरीयैर्वा समस्येत्तिपंचभिः॥
२१॥ सायमुपस्थानं:॥ आग्न आयूंषीति तिसृभिः
द्वाभ्यामग्नेत्वमित्यथ॥ कुर्यात्सायमुपस्थानेप्रजाप
तेनत्वदिति॥ सूर्योनइतिपंचर्चः प्रातरौपासनेजपेत्॥
उदुत्यं चित्रं द्वाभ्यामुपयंच प्रजापते॥ २१॥ अथसमस्यहो
मः॥ कालद्वये हशक्तश्चेदेकस्मिन्काल एव च॥ प्रागेवोक्ते
न विधिना समस्यं सायमाचरेत्॥ चतस्र आहुतीः कुर्यात्
द्वेद्वे सायमाहुतीः॥ द्वे प्रातराहुती सायं होमे चैकासमिध्य
ि॥ समस्य सायमारभ्य जुहुयात्सायमाहुतीः॥ परिषि

५०

३५

ध्याकृतीः प्रातर्हुत्वानुपरिषेचयेत्॥ द्विः सायं होमवन्म
न्त्रः द्विः प्रातर्होमवत्स्मृतं॥ उपस्थानं सहृत्कार्यं शेषं प्रस
तिवद्भवेत्॥ हविष्यान्नं द्विदैवत्यमिति सूर्याग्निदैवतं॥
समस्येपंचभिर्ग्रासैः प्रजापत्येकयर्चया॥ कुर्यादग्नेरु
पस्थानं सर्वत्रोंचमद्रसथ॥ अभिवाद्य जपेद्देवीं यथाशा
स्त्राथ वा दश॥ भस्माभिधारणं कुर्याद्गृह्यसामेस्यचैवतु॥
ललाटे हृदये बाहो मस्तके च यथाक्रमं॥ होमकालेपिकु
र्वीत त्रिपुंड्रं भस्मधारणं॥ मानस्तोके यनेनैवके चिदाहुर्म
नीषिणः॥ अतपेद्दरणीपाणिं नातोत्रो युगपन्नयेत्॥ ॥३५॥

पे
अयंतेयोनिः समिदूपालिंगं ~~यातेपालिंगं~~ यातेअग्नइत्ति ॥ तथा
च श्रौतसूत्रे ॥ अयंतेयोनिरित्समरणी गार्हपत्येप्रतितपेत्पा
लिंच ॥ यातेअग्नेर्यत्तियेति ॥ तथाच स्मृतिः ॥ समिधा ॥
अश्वत्थसमिधं वापित्रामी समिधमेवच ॥ तदभावेथवा
चान्याः समिधः प्रतपेद्बुधः ॥ पालाशाः खादिरोश्वत्थशम्यु
दुंबरजाः समित् ॥ अपामार्गार्कदूर्वाश्च कुशाश्चेत्यपरेवि
दुः ॥ सत्वचः समिधः कार्या ऋजुः श्लक्ष्णाः समास्तथा ॥ श
स्ताद्दशांगुलास्तास्यु र्द्वादशांगुलकास्तथा ॥ षण्मासंस्या
च्छमीश्चाश्वत्थखादिरंतु त्रिमासकं ॥ मासत्रयंतु पालाशेप्य

५०

श्वसोहरहस्मृतः॥ पालाशाः खदिरश्चापामार्गश्चार्कस्त
थैवच॥ औपासने शुभाः प्रोक्ता स्त्रिदिनं स्यादुदुंबरः॥
इयैषामप्यभावे तु कुशाइसपरे विदुः॥ मासमेकं शाग्र
ह्याद्दूर्वास्यात्सप्त वत्॥ सप्तः शमीत्वपालाशं ससाहमि
ति केचन॥ यदाद्ये पिशाखास्युः केचिघत्त्र विदो विदुः॥
प्रयोगपारिजाते॥ अकाले यत्कृतं कर्म कालं प्राप्य पुनः
क्रिया॥ कालातीतं तु यः कुर्यादकृतं परिचक्षते॥ यत्कर्म
क्रियते मोहादकाले केनचित्कचित्॥ काले प्राप्ते पुनः कुर्या
त्कृतं चापि हि कर्मतत्॥ ५०॥ संध्योपासनादिकमित्यर्थः॥

१३५॥ ते कु २६॥

अथ वैश्वदेवः॥ तत्रेदं गृह्यं॥ अथ सायं प्रातः सिद्धस्य हविष
स्य जुहुयादग्निहोत्रदेवताभ्य इति॥ स्मृत्यर्थसारे॥ गृहस्थो
वैश्वदेवाख्यं कर्म प्रारभेद्दिवा॥ अस्य चैवात्मनश्चैव संस्का
रार्थमिहेष्यते॥ कोद्रवं चणकं माषं मसूरं च कुलित्थकं॥ कां
जिपक्वं पराम्नं च वैश्वदेवे तु वर्जयेत्॥ कारिका॥ गृहस्थो वै
श्वदेवाख्यं कर्म प्रारभेत दिवा॥ तंत्रं नास्त्यत्र भगवद्वृत्तिव
द्वचनं यथा॥ औपासनाग्निमन्वाधाय समिध्याग्निं हविर्भुजं॥
पर्युक्ष्य परिषिंच्याग्निमलंकृत्य च पूर्ववत्॥ हविष्यं पक्वमाद
ध्यादधिश्रित्यानले च तत्॥ प्रोक्ष्योद्वास्य घृताभ्यक्तं हवि

= महार्णवे। यत्किंचिज्जुहुयाद्ग्नौ तत्सर्वं स्वागपूर्वकं। — ३

५०

॥३७॥

सव्यं निधाय च॥ जुहुयात्सर्पिषा युक्तं तैलक्षार विवर्जितं॥ दध्ना युक्तं पयसा युक्तं वा तदभावे बुनापि वा॥ साय लीयेः॥ अन्नाभावे प्रवासे च तंदुलानोषधीस्तु वा॥ पयो दधि घृतं वापि कंदमूलफलानि वा॥ योजयेद्देवयज्ञादौ जलं वापत्सु वा जले॥ द्रवं स्रुवेण होतव्यं पाणिना कठिनं हविः॥ संग्रहात् कुर्ति मेकैकामेकैकां मुखे हुनेत्॥ स्वाहाकारेण चैवाग्नौ तत्सर्वं स्यागपूर्वकं॥ अन्यत्र कुरुते यस्तु कृतं तस्य वृथा भवेत्॥ त्रेणेन कः॥ त्रेधा विभज्य स्विष्टान्नं त्रिः प्रोक्ष्य पुरतः स्थितं॥ हविर्यदेकपात्रस्थं मध्ये दे

तिं स्त्रु

५०

॥३७॥

वंतथोत्तरे ॥ भौतिकं पैत्रिकं याम्यं मनुष्यं वायव्यपात्रके ।
देवभूतपितृणां च तत्तद्भागेन वै क्रमात् ॥ उत्तानेन तु
हस्तेन त्वंगुष्ठाग्रेण पीडनं ॥ संहतांगुलिना चैव ताम्र
तोनुकुर्याद्बुधः ॥ कृत्वा हस्तेन स्रुचा येत्यादिभिर्द्विजाभि
स्तथा ॥ प्रजापतिपादस्याग्निर्वै भवेद्देवेन तु स्मृतिः ॥ प
र्युक्षणं जले कुर्याद्देवयज्ञो यमीरितः ॥ कृत्वा व्याहृतिभि
श्चात्र हरेद्भूमिं बलिं तथा ॥ भूतयज्ञं प्रकुर्वीत तद्यग्नेरु
त्तरदेशतः ॥ एभिर्भूमि बलिं हुत्वा ग्राक्संस्थानानिरं
तरान् ॥ मुक्तांतरांश्च प्राक्संस्थान्मध्ये इत्यादिभिः हरे

॥३८॥

त्॥ इहापि भवतिस्वाहाकारोनपितृयज्ञके॥ अभ्योह
तीब्रुवे: अस भिंद्रायेतिबळिंहरेत्॥ उदगेंद्राह्मवेरिंद्र
पुरुषेभ्योबळिंहरेत्॥ यमायेसंतरावस्यहरेद्दक्षिणतो
बळिं॥ याम्याद्ध्वेरुदायमपुरुषेभ्योबळिंहरेत्॥ प्राच्यां
ब्रह्मबळेर्द्दत्वावरुण्यायेतिमंत्रतः॥ तस्मादुदक्वरुण
पुरुषेभ्योबळिंहरेत्॥ सोमायेसंतरावस्यहरेदुत्तरतो
बळिं॥ सोम्याद्धळेरूर्द्ध्वंसोमपुरुषेभ्योबळिंहरेत्॥ अ
यंतत्स्वाहस्वाहांतेबळिंहृत्वानिरंतरान्॥ मुहूर्तांतरा
वभिंद्रादि[illegible]मेवानोंबळिंहरेत्॥ ऐंद्रादिबळितःप्रा

॥३८॥

यद्दा

व्यां[illegible]स्यासु रक्षोबलिः ॥ अंतराके बली हुत्वाग्निश्चैमं
त्रैरतः परं ॥ रक्षोभ्य इति सर्वांसां बलिमुत्तरतो हरेत् ॥
भूतयज्ञोयमुदितः प्राचीनावीस्यतः परं ॥ स्वधापितृभ्य इ
त्युक्त्वा दक्षिणस्यां तु निर्वपेत् ॥ पितृयज्ञोयमुद्दिष्टनक्तं
चैतत्त्रयं भवेत् ॥ अथ यज्ञो मनुष्याणां कर्तव्यः सनकादि
नां ॥ अग्नावेवाथ नान्यत्र केचिदाकुर्मनीषिणः ॥ तथाच
शौनकः ॥ सूर्यादिदशभिर्मंत्रैर्हुत्वा तु परिषिंचयेत् ॥ त
तो व्याहृतिभिर्हुत्वा प्युदग्नेर्बलिमाहरेत् ॥ प्रागादीशान
पर्यंतं अग्न्यग्रे महीतले ॥ बदरीफलमात्रां[illegible]घृतक्षी

मं

प्राक्सं

रादिभिश्रितं ॥ सूर्यादिवास्तुपर्यंतं नैरंतर्येण तान्हरे
त् ॥ पूर्वपश्चिमभागे तु स्युदक्संस्थं बलिं हरेत् ॥ चक्रम
ध्ये तु पंचानां प्राक्संस्थं ब्रह्मपोरुषं ॥ दक्षिणे तु विश्वेभ्य न
सर्वेभ्य इति पश्चिमे ॥ उत्तरे च दिवेयादिनक्तमिसा
दिनानि शि ॥ ईशान्यां तु बलिं श्वकादृष्टेभ्यो थ बलिं ह
रेत् ॥ तथा तृतीय भागा[illegible] वारुणेये नि नपे भुद्याञ्जप
सव्यं स्वधेत्यादिमंत्रेण पितृतीर्थतः ॥ नाम मंत्रं समुच्चा
र्य बलिं दद्यात् तोजलं ॥ पितृयज्ञाग्रे विलंतयाने ऋय ॥३९॥
काष्ठाकेण पश्चाद्वायव्यकोणे तु श्वुनां बलिमथाहरेत् ॥

स्वाहाकारश्चोपवीतिपित्तत्तीर्थेनतत्तया॥ द्वोग्राम
शाबलौचेतोश्वानोद्वप्रणोदितो॥ देवलंवापित्
तंवायाम्याकारेणवैनलिं॥ अग्नोदृयाद्रुपस्थानं
हृत्वाथगृहदेवता॥ ब्रह्मणेगृहमध्येतुदत्वादिक्षु
चतसृष्व॥ सिध्यादिभ्योबलिंदद्यात्समंतात्पूर्वतः
क्रमात्॥ नपश्येद्बलिहरणंदत्वायत्नबलिंद्विजः॥
स्वपनेवोद्धरेन्मोहाद्धरेर्वीर्विनश्यति॥ देवयज्ञा
न्नशेषेणग्रहद्वारेबलिंहरेत्॥ भूतयज्ञान्नशेषेणा
वासेभ्योबलिंहरेत्॥ वांडालपतितेभ्यश्चपि

२= द्वारि शान्मंत्र मंत्रैरेतैर्गृहीनंच बलिं हरेत्॥ सनकादि मनुष्येभ्यो हंतकारेण ...

त्रृयज्ञान्निरोधतः ।। वासैश्वभ्योबलिं रात्रौनैवदद्यान्मही
तले ।। येभूताः प्रचरंतिचपात्रेदद्याद्बलिंसुधीः ।। इ
त्थंकुर्याद्द्विजोयज्ञान्दिवानक्तंचानित्यशः ।। वैश्वदेवो
दिवानक्तंनभवेच्चेत्पृथक्पृथक् ।। प्रातरेवद्विरावत्त्या
कर्तव्यंस्मृतिशासनात् ।। सूर्यादिभ्योहुनेत्पूर्वमग्न्या
दिभ्यस्ततःपरं ।। हुत्वाव्याहृतिभिःपश्चाद्भूतयज्ञ
स्तथैवच ।। चशब्दाच्चित्तयज्ञास्तथैवेति ।। उपस्था
नंसहृत्कार्यंसद्दृदेवगृहेबलिं ।। दद्याद्देवायसादि
भ्योभूतेभ्यश्चबलिंन्सहृत् ।। असंस्कृतप्रमीताश्च ।।श्री।।

द्वारे तिष्ठंति ये मम ॥ ते सर्वे तृप्तिमायांतु दत्वा धौतेन

वारिणा ॥ अथ विभक्ते वैश्वदेवः ॥ साग्नयो प्येकपाका

स्युः पुत्र भ्रात्रादयो यदि ॥ न पृथक् वैश्वदेवास्युः स्वपा

को न्निर्वपेद्गृहि ॥ एकपाके निवसतो पितृ देवजार्च

नं ॥ एके भवेद्विभक्तानां तद्देवस्यात् पृथक् पृथक् ॥ त

या चक्रारिका ॥ कुर्वीत स्नातकश्चैदं पृथक् पाको भवे

द्यदि ॥ अन्नाभावे प्यहरहः कर्त्तव्यं पयसादिना ॥ घृतां

गुष्ठेन सव्यस्य ब्रह्मसूत्रं करस्य तु ॥ इत्यादन्नं वैश्वदेवे

पितृभ्यः स्वपिता पितुः ॥ रागाकुले ॥ स्मृत्यर्थसारे ॥ त्रि

विभक्तेन संसृष्टे चैकेना पितु यहस्तं ॥ देवयज्ञादिका

न्सर्वास्तौ किकाग्नौ हुतेयदि ।। संस्कारान्त्वाग्निनः स
र्वं कुर्यान्निसत्वसिद्धये ।। संसृष्टा भ्रातरः कुर्युर्ब्रह्मय
ज्ञं पृथक् पृथक् ।। होममुख्येश्च भोक्तव्यमन्त्रमोपासने
कृतं ।। अन्येश्चैव न भोक्तव्यं भोक्तव्यं लौकिके कृतं ।। ७
अथानग्निकवैश्वदेवः सायलीये ।। साग्निकः पित्र्
यं हुते बलिकर्म समारभेत् ।। अनग्निर्हुतशेषं तु बलिं
काकबलिं हरेत् ।। संग्रहे ।। हुत्वा व्याहृतिभिश्चान्नं कु
र्यात् शाकलकादिभिः ।। भूतेभ्यश्च बलिं दद्यादन्नम
श्नात्यनग्निमान् ।। अनग्निकस्तु यो विप्रः स्वान्नं स्या ।।७१।।

हृतिफर्वकं ॥ कृत्वा शाकलमंत्रैश्च शिष्टं काकबलिं हरेत् ॥
अन्नं व्याहृतिभिर्हुत्वा कृत्वा मंत्रैश्च शाकलैः ॥ प्रजापते
र्हविर्हुत्वा पूजयेदतिथिस्ततः ॥ अतिथिलक्षणं ॥ व्या
घ्रपादः ॥ अचिंतितमनाहूतं वैश्वदेवे व्यवस्थितं ॥ अ
तिथिं तं विजानीयान्नैकग्रामनिवासिनं ॥ क्षुधार्त्तस्तृ
षितश्चैव श्रांतो गृहमुपागतः ॥ प्रयत्नेन तु वैपूज्यः
सोतिथिः स्वर्गसंक्रमः ॥ अपृच्छेद्गोत्रचरणं न स्वाध्या
यव्रतानि च ॥ चित्तेन भावयेत्तं वै देवरूपमयो हि सः ॥
अथागतेतिथौ विमुखे सति दोषमस्तमाह ॥ विष्णुस्मृतिः ॥
अतिथिर्यस्य भग्नाशो गृहाद्यादि निवर्त्तते ॥ स तस्य

दुष्कृतं दत्वा पुण्यमादाय गच्छति ॥ संध्या तिथि विमुखे वेदे
ष माह ॥ याज्ञवल्क्यः ॥ दिने तिथौ तु विमुखे गते यस्मात
कं भवेत् ॥ तद्दोषं गुणं प्रोक्तं स्मर्ये [illegible] विमुखे स्मृति ॥
अथ सूतके सांध्यं ॥ वैश्वदेवं तथा श्राद्धं ब्रह्मयज्ञं च सूतके ॥
न कुर्यात्स्वयमन्यैश्च कारयेन्न च सर्वथा ॥ तथा च स्मृत्य
र्थसारे ॥ कुर्यात्संच महायज्ञानि स शुः सूतकं विना ॥
नित्यं नैमित्तिकं काम्यं सूतकेपि न हापयेत् ॥ नित्यं औपा
सनं नैमित्तिकं उपरागे स्नानदानादिकं काम्यं औश्वा
युजीयं इष्टापूजनं च सर्वं थानयेजेत् ॥ अन्येन कारय
दित्यर्थः ॥ संध्यामिष्टीं होमं च यावज्जीवं समाचरेत् ॥

पिं ३

नसजेत्सूतके वापि यज्ञनाच्छिदनोद्विजः ॥ नित्यं नैमित्ति
कं काम्यं यत्स्वकर्मश्रुचोदितं ॥ सूतकादिनिमित्तेषु हा
वयेन्नतु हापयेत् ॥ सूतके तु समुत्पन्ने स्मार्तकर्म क
थं भवेत् ॥ पितृयज्ञं च तं होममन्यगोत्रेण कारयेत् ॥
पिंडयज्ञं पितृयज्ञं चरुं स्थालीपाकं होमं नित्योपासनं
चान्येन कारयेदित्यर्थः ॥ अथ ब्रह्मयज्ञः ॥ यत्स्वाध्याय
मधीते स ब्रह्मयज्ञ इति सूत्रं ॥ स्मृतिः ॥ प्रातश्चैत्संग
वादूर्ध्वं मंते वा नियकर्मणः ॥ अथवा वैश्वदेवांते ब्रह्म
यज्ञस्त्रिधा स्मृतः ॥ इति कालत्रयमुक्तं तत्रप्रातरेव यज्ञो

॥८३॥

तव्यं॥ आश्वलायनानां कालमाह॥ शाकलः॥ आवर्ते
नेवग्र्याप: कुशपाणिस्त बह्वृचः॥ ब्रह्मयज्ञं च कुर्वी
त संध्यामाध्यान्हिकीं ततः॥ स्नानं कृत्वा तु मध्यान्हे द्वि
जः संध्यामुपासते॥ ब्रह्मयज्ञं ततः कुर्यात्तर्पणं तैत्ति
रीयकः॥ अथ कारिका॥ यामात्प्राच्यामुदीच्यां वा य
त्र॥ दिवस्याद्धनिंदिता॥ अपोवगाह्य तु स्नायादुपविसे
वसाद्विजः॥ धौतशुक्लांबरः कुर्यात्कर्मांगाचमनं ततः॥
दर्भान्बद्ध्वा शुचौ देशे प्रागग्रानास्तरेत्तथा॥ आच
म्य हृदि संस्पृष्ट्वा बाहू चोह दि संस्पृशेत्तत॥ ब्रह्मयज्ञे वि

८२

॥८३॥

त्रेधोयं कर्मांगाचमनं स्मृतं ॥ आश्वलायनः ॥ सव्य
स्य पाणेरंगुष्ठप्रदेशिन्योस्तु मध्यगः ॥ दक्षिणस्यां
गुलीन्यस्य च तस्रोंगुष्ठवर्जिताः ॥ तथा सव्यकरांगुष्ठं
दक्षिणांगुष्ठवेष्टितं ॥ संबंधमेवं कुर्वीत न्यसेद्दक्षिण
सक्थिनी ॥ कारिका ॥ दर्भेषूपविष्टः कर्मण्यत्राप्यु
स्वएव सन् ॥ हस्तोपस्थं करे सव्ये उत्तानं प्रादिदं उक्तं ॥
शाकलः ॥ वामं संपादयेज्जंघे दक्षिणस्यास समुन्नतं ॥
पादे चामे न्यसेत्सादं दक्षिणस्यादुपस्थकं ॥ पवित्रे
स्थापयेदुत्के प्रागग्रे दक्षिणेन तु ॥ नीचं प्रागंगु

लंतेन संदध्याद्दक्षिणं करं॥ ऊर्ध्वं तिर्यगधस्ताद्वा निक्षेतेयदिवाक्षिणी॥ समीलयेन्नेत्रे न चात्मानं समाहितमना भवेत्त्॥ सूक्ष्माद्यन्यतमं पूर्वमभिसंधायशक्तितः॥ ॐ कवोव्याहृतिभिस्तिसृभिः समस्ताभ्यस्त सहृदयेत्॥ पच्छस्त्वर्धर्च्चशः सर्वां सावित्रीं त्रिर्वै देरथ॥ पूर्वाभिवदनो यावत्तदधीत्य समाहितः॥
अग्निमीळे इतित्वादीन्वेदांश्चापि स्वशक्तितः॥
नमोब्रह्मणइत्येतां स्त्रिरक्त्वा प्रणवं वदेत्॥ प्रणवाद्यंतं तस्यामेध्यमेन स्वरेण तु॥ अधीते मन

ध॰ ५४ श्री॰ ॥ ५४ ॥

सिञ्चामेब्रह्मयसंकरोतिचेत्॥ वसिष्ठः॥ सर्वत्रों
कारमुच्चार्य श्राद्धमंत्रेषुनोच्चरेत्॥ आर्षछंदांसि
वैतद्वद्यद्देत्तर्पणकर्मणि॥ अपांसमीपमागम्यतर्प
येद्यद्देवताः॥ अन्वारब्धेनसव्येनदक्षिणेनतुपा
णिना॥ एवमंतानितत्त्यंतुचेसंतेः प्रतिमंत्रकं॥
धातुनैवाथपरस्मैपदेनवचनंयथा॥ सिंचेहसजाप
तिस्तृप्यत्विसपोदेवतीर्थतः॥ धातुस्तृप्तियथा
लिंगंमंत्रांतेषुप्रयुज्यते॥ मंत्रैः रातर्चिनस्तृप्यत्वि
सादिभिरतःपरं॥ प्रतिमंत्रंनीवीतीतुतर्पयेदृषि

५७० ॥८५॥

तीर्थतः ॥ देवतास्तर्पइत्वानुरात्तर्चित्रभृतीनथ ॥ ऋ
षीन्ब्रह्मादरासंतर्प्य सनकादींश्च सप्त वै ॥ प्राचीनावी
त्य येदानींतर्पयेत्पितृत्तीर्थतः ॥ सुमंत्वियादिभिर्मं
त्रैःप्रति मंत्रंचपूर्वकं ॥ द्वितीयांतेषु मंत्रेषु तर्पयामि
पदंवदेत् ॥ पितरंचाथ शर्माणं गोत्रं संतर्पयेत्क्रमा
त् ॥ तथाच शाकल्यसंहितायां ॥ तर्पयेत्पितृस्त्रीना
दौ ततश्चैव तु मातरं ॥ सापत्नमातरं पश्चात्पितामह्या
दिकान्क्रमात् ॥ आदौ पिता ततो माता सापत्नजन
नी तथा ॥ मातामहाः सपत्नीकाह्यात्मपत्नीतिरंत

३० ॥८५॥

र॥ सुतभ्रातृपितृव्याश्च मातुला श्वसृभार्यकाः॥ दु
हिता भगिनी चैव दौहित्रो भागिनेयकः॥ पितृष्वसा
मातृष्वसा श्वशुरो गुरुरर्थिनः॥ एतेस्युः पितरः स्ती
र्थतर्पणे चमहालये॥ याज्ञवल्क्यः॥ सवर्णेभ्योज
लं देयं नानावर्णेभ्य एव च॥ नामगोत्रस्वधाकारैस्त
र्पयेदनुपूर्वशः॥ स्मृत्यर्थसारे॥ वसुरुद्रादिस्वरूपां
श्राद्धार्थे तर्पयेत्पितॄन्॥ नामगोत्रस्वधाकारैः प्रस
हं तर्पयेत्सुधीः॥ एकैकमंजलिं देवा न्द्वौ द्वौ तु स
नकादयः॥ अर्हंति पितरस्त्रींस्त्रीन् स्त्रियश्चैकैकमं

अ संस्कृतप्रमीतानां तटेद्द्याज्जलांजलिं =२

५१० ९०

जलिं॥ मातृमुख्याः स्त्रियास्तिस्रस्तासामर्घ्यं जलित्रयं॥
॥४५॥ दद्यादेकैकमन्यासां स्त्रीणां देवांजलिं बुधः॥ देवानां च
पितॄणां च जले दद्याज्जलांजलिं॥ तिलदर्भयुतं तोयं स्व
धयायत्र दृश्यते॥ तस्मायमस्तं भक्त्वा पितॄणां दत्तमक्षयं॥
भूमौ यस्तर्पणं कुर्यात् लौहे कांस्ये च मृन्मये॥ तर्जन्यंगुष्ठ
योगे च स पुत्रः पितृघातकः॥ स्थले वापि शुचौ देशे कु
शास्तीर्णे च भाजने॥ ताम्रादिके च पर्णे वा तर्पयेत्स ति
लैर्जलैः॥ पाणिनैकगुणं प्रोक्तं दर्भैः शतगुणं भवेत्॥
अक्षय्यं खड्गपात्रेण पितॄणां तर्पणं भवेत्॥ तर्पयेन्न ॥४६॥
तीर्थे न गंगलीयात्तेनैव जलं॥ अन्यथा कुरुते यस्तु नरक

प्रतिपद्यते ॥ अथ तिलतर्पणं ॥ स्मृत्यर्थसारे ॥ विवाहे चो
पनयने चौले सति यथाक्रमं ॥ वर्षमर्धं तदर्द्धं तु नेत्येके
तिलतर्पणं ॥ सप्तम्यां रविवारे च जन्मर्क्षे दिवसेषु च ॥
गृहे निषिद्धं सतिलतर्पणं तद्बहिर्भवेत् ॥ भानुवारे भौ
मवारे नंदाभृगुमघासु च ॥ त्रयोदश्यां तु सप्तम्यां भरण्यां
कृत्तिकासु च ॥ अयनद्वितये चैव चतसृषु युगादिषु ॥
पिंडदानं मृदास्नानं न कुर्यात्तिलतर्पणं ॥ अर्के शुक्रे त्र
योदश्यां मघायां निशि संध्ययोः ॥ गृहे मृताहे जन्मर्क्षे
न कुर्यात्तिलतर्पणं ॥ पवित्रं कौशिकं ताम्रराजतं हेममये
व च ॥ धारयेद्दक्षिणे पाणौ पवित्रं चोत्तरोत्तरं ॥ तिलाना

५० ॥४७॥ ५०

मप्य भावेतु सुवर्णरजतान्वितं ॥ तद्‌भावेतु कर्त्तव्यं दर्भैर्मं
त्रैश्च तर्पणं ॥ इदं तु नित्यविषये ॥ अथ विशेषः कथ्यते ।
प्रेतपक्षे व्यतीपाते संक्रांतौ तिथिपर्वसु ॥ निषिद्धेपि
तिथौवारे कर्त्तव्यं तिलतर्पणं ॥ उपरागे व्यतीपाते गंगा
यां मघपर्वणि ॥ आदित्यादिनिषिद्धेपि कर्त्तव्यं तिलत
र्पणं ॥ नद्यां तीर्थे विशेषेतु प्रेतकार्येतथैव च ॥ निषि
द्धेपि दिने कुर्यात्पिंडदानं तिलोदकं ॥ प्रेतपक्षे गंगाया
मुपरागे तथैव च ॥ व्रतोद्वाहेपि कुर्वीत तर्पणं तिलसं
युतं ॥ व्यतीपाते च संक्रांतौ युगमन्वंतरादिषु तर्पइत्वा
पितॄन्पश्चाच्छ्राद्धं कुर्यात्प्रयत्नतः ॥ पक्षश्राद्धं हिरण्येप

॥४७॥ ५

चपश्राद्धघात्तिलोदकं॥ तथाचैवाष्टका श्राद्धे श्राद्धे चैवा
नुमासिके॥ तस्मान्नुमासिकं श्राद्धं सपिंडीकरणात्परं॥ वै
श्वदेवं ततः कुर्यात्तर्पणं तिलसंयुतं॥ दर्शे तिलोदकं पूर्वं
पश्चाद्धघान्महालये॥ आब्दिके नापरं पूर्वं परेहनि तिलो
दकं॥ तीर्थश्राद्धे गयाश्राद्धे प्रत्यब्दे च महालये॥ परेहनि
द्विजः कुर्यात्तर्पणं तिलसंयुतं॥ पक्षश्राद्धं तु निर्वर्त्य सतर्प
णं तु दिने दिने॥ सत्र महालयेदघात्परेहनि तिलोदकं॥
वृद्धिश्राद्धे सपिंडे च प्रेतश्राद्धे नुमासिके॥ परेहनि विप्र
कारवान्न कुर्यात्तिलतर्पणं॥ अथ श्राद्धाहतर्पणं॥
पित्राः प्रत्याब्दिके प्राप्ते तर्पणं तु कथं भवेत्॥ जलेनै

९७

५५० ५०

॥८८॥

वश्यकुर्वीततनित्यंतेपितृकर्मणि॥श्राद्धंकृत्वातुविधि
वद्देश्वदेवादिकंततः॥ब्रह्मयज्ञंततःकुर्यात्तर्पणंतु
तिलैर्विना॥हारितः॥ततःपरेह्निकुर्वीततर्पणंपुरुषः
सुधीः॥तद्वचैस्तिलदर्भैश्चप्रातःस्नात्वामत्तेर्जलैः॥
श्राद्धंकृत्वातुपूर्वेद्युःप्रातःस्नात्वापरेहनि॥तर्पयेत्पि
तृस्त्रीनादौपश्चात्संध्यादिकाःक्रियाः॥तर्पणंतम
तःप्रातर्द्वितीयेप्रहरेपयः॥तत्तोयेजलमिसाकुश्च
तुर्थेरुधिरंभवेत्॥प्रयोगपारिजाते॥स्नात्वातीरं
समं चैवसुपविश्यकुशासने॥संतर्पयेत्पितृस्त्रींश्च ॥८८॥

मासा०१

श्रा

स्नात्वाव स्त्रं च धारयेत् ॥ यस्तु तर्पयति भ्रातहत्वौंद्ध
परेहनि ॥ पितरस्तु क्षिमा थांतु न च कुर्वन्ति वै श्रवं ॥
परेघुः श्राद्ध हन्मा र्यीयोन तर्पयते पितॄन् ॥ अत्रसा
पितरः स्तस्य रागाधं द त्वा व्रजंतिते ॥ श्राद्धांगतर्पणं कु
र्यात्स तिलत्वं परे हनि ॥ पित्रोर्विजय एव स्यान्नान्यस्य

मा

विषयेभवेत् ॥ जीवेन्मो पितायस्य माता यदि विपद्य
ते ॥ मातुः श्राद्धं सुतः कुर्या न्न कुर्यात्तिलतर्पणं ॥ ति
लतर्पणं तु यः कुर्या न्मातुरू द्धियते ॥ तत्तोयं त्रोणि

स्यादीर

तं दद्यादि सैवं मनुरब्रवीत् ॥ इति प्रसंगात्कथितं ॥ अ

॥२९॥

यंतुब्रह्मयज्ञोस्यभिक्षादानादिदक्षिणा ॥ कुर्यात्तिष्ठंघ
यानोवाब्रह्मयज्ञसमंभवेत् ॥ देवेभ्यः शुचिः स्वयंवास्या
त्तदानध्यायमिष्यते ॥ प्रागूर्ध्वंवाभवेच्छ्रायंवैश्वदे
वस्यकर्मणः ॥ ऊर्ध्वंमनुष्ययज्ञस्य सचेष्टातिथिपू
जनं ॥ स्वशक्त्याभोजयेद्विप्रान् अतिथीन् समुपा
गतान् ॥ मनुः ॥ विद्यातपःसमिद्धेषु हुतंविप्रमु
खाग्निषु ॥ निस्तारयतिदुर्गांश्च महतःश्चैवकिल्बि
षात् ॥ ७० ॥ इतिश्रीनारायणकृतायांधर्मप्रवृत्तौ
वैश्वादितर्पणांतप्रकरणं ॥ ॥ अथयद्दिवातीतक

५०

॥२९॥

र्माण्याह ॥ नष्टतानिप्रमादाद्वेलायाः कर्माणिमानि
च ॥ रात्रावपि तु कार्याणि विना सौरं च तर्पणं ॥ दिवो
दितानि कर्माणि प्रमादादकृतानि वै ॥ शार्वर्याः प्रथमे
यामे तानि कुर्याद्यथाक्रमं ॥ रात्रौ प्रहरपर्यंतं दिवाकर्मा
णि कारयेत् ॥ अवगाहं च सौरं च ब्रह्मयज्ञं च वर्जयेत् ॥
दिवोदिताः क्रियाः कार्या रात्रावपि यथाक्रमं ॥ विना
सौरं चावगाहं ब्रह्मयज्ञं च तर्पणं ॥ केचिद्रात्रावपि कु
र्याद्ध्यानयज्ञं च इच्छति ॥ ग्रामे मनसा स्वाध्यायमधी
यीत दिवानक्तं चेत्यापस्तंबविषयं ॥ तथा च स्मृतिः ॥

॥५०॥

आचार्याः केचिदिच्छंति रात्रावपि हि तर्पणं ॥ तद्यतुः
शाखिनामेव नान्येषां तु विधीयते ॥ मध्याह्ने समति
क्रांते सायंकालो भवेद्यदि ॥ सायंसंध्यामुपास्याद्दौ सं
ध्यामाध्याह्निकीं ततः ॥ सायंकाले व्यतीते चेदस्तंया
ते दिवाकरे ॥ कुर्याद्दावर्त्तनी संध्यां समारभ्य यथाक्र
मं ॥ आवर्त्तनो गमध्याह्ने तस्योर्ध्वं ध्येय सर्यः ॥ कुर्वीता
वर्तनी संध्यां रात्रावपि न दुष्यति ॥ दद्यादर्घ्यं तु गाय
त्र्या सौरसूक्तं विवर्जिता ॥ मध्याह्नसंध्या रात्रौ चे
त्प्रमादात्क्रियते यदि ॥ सौरस्थाने जपेत्सूक्तं सौरं वै

॥५०॥

श्वानरीयकं॥ अथ देवतार्चनविधिः॥ अग्नौ वाथवा
सूर्ये प्रतिमायां जलेपि वा॥ पूजयेद्भक्तिभावेन प्रसहं
परमेश्वरं॥ नारायणं महादेवमादिसंगणनायकं॥
शक्तिं चैवाथ पंचैतान् प्रसहं पूजयेद्द्विजः॥ देवतास्था
पने द्वीरस्थावरे भ्रा ङ्गुखा हिताः॥ गृहादौ जंगमेवा
पिस्थापयेत्प्रसन्मनः॥ अभिष्टदेवतां मध्ये स्थाप
येत्तान्यथाक्रमं॥ यदा मध्ये भवेच्छंभुरीशान्यां पूज
येद्धरिं॥ आग्नेयां पूजयेत्सूर्यं नैर्ऋत्यां गणनायकं॥
वायव्यां पूजयेद्देवीमित्येतान्वैयथाक्रमं॥ तथासं

पं०

॥५१॥

ग्रहे ॥ शंभुमध्यगते हरीन हर भद्रे ब्रह्मा हरौ शंकरे भास्ये
नागसुता रवौ हरगणेशा जौ बिंदिकास्वेष्ठा पित्ताः ॥ देव्यां
विष्णुहरैकदंत रवयोर्लंबोदरे जेश्वरे नार्या शंकरभा
गतस्तु शुभदा व्यस्तास्तु ते हानिदाः ॥ अथागमविष
ये प्राचीरुच्यते ॥ पूज्यपूजकयोर्मध्ये पूर्वमित्यभिधी
यते ॥ नैशानं पूजकापेक्ष्यं पूज्यापेक्ष्यं तु तद्भवेत् ॥ दे
वस्य मुखमारभ्य दिशं प्राचीं प्रकल्पयेत् ॥ तदादि परि
चाराणां गाधावरता क्रमात् ॥ अस्मिन्विवस्वान्विभु
वलक्षदितिप्राचीति तां वेदविदो वदंति ॥ मध्ये पुनः पू

प्र०

॥५१॥

जकपूज्ययोश्चसद्दागमज्ञाः प्रवदंतिसंततः ॥ मुखेपुष्पांज
लिंदत्वागणेशाद्यर्चनंभवेत् ॥ गणेशस्त्वमुख्यश्चेतन्न
स्सूर्यक्रमाद्भवेत् ॥१८॥ गणेशाद्यौसमभ्यर्च्य शैवोवावि
ष्णुमपूजयेत् ॥ अर्चयेच्चशिवंपश्चाद्विवामादौतुवैष्णवः ॥
ततोविष्णुततोदुर्गामेवंस्यादर्चनक्रिया ॥ अर्चयेद्यथवा
विप्रःशिष्टाचारोयथाभवेत् ॥ हेमराजततास्त्राणां स
र्वेषामर्घ्यभाजनं ॥ शिवस्यैवोपरित्याज्यशंखेनात्रप्र
शस्यते ॥ आवाहनासनंपाद्यमर्घ्यमाचमनंतथा ॥ स्ना
नंवस्त्रोपवीतानिगंधपुष्पेचधूपकं ॥ दीपंनैवेद्यतांबू

धा०

॥५२॥

लौ अदक्षिण्यं विसर्जनं॥ अस्त्रेणापूजयेद्देवं स्नापयेत्सोरु
षेण च॥ शालग्रामे स्थावरे च आवाहन विसर्जनं॥ शा
लग्रामशिलायां तु नित्यं संनिहितो हरिः॥ स्नापयित्वा
र्चयेद्देवं यदिच्छेत्सुण्यमात्मनि॥ चर्मण्यष्टिकायस यो:
पाषाणे नोपवेशयेत्॥ वस्त्रमासाद्य ताम्रयोह्यर्चयेत्पु
रुषोत्तमं॥ तदर्चा निःफला यस्यास्सयाति रौरवं ध्रुवं॥
स्नाने वस्त्रे च नैवेद्ये दद्याद्दाचमनीयकं॥ अंगलग्नं च
जीर्णं च देववस्त्रं न चार्पयेत्॥ नांगुष्ठे मर्दयेद्देवं नाधः
पुष्पैः समर्चयेत्॥ कराग्रेर्न क्षिपेत्तोयं वज्रपातसमं

ष्र०

॥५२॥

भवेत् ॥ जलंपर्युषितं साज्यपात्राणि कुसुमानि च ॥ तु
लस्या गंगस्य बिल्वं च न वर्ज्यं जाह्नवीजलं ॥ नाक्षतैरर्च
येद्विष्णुं न तुलस्या गणेश्वरं ॥ दूर्वाभिर्नार्चयेद्दुर्गां नके
तक्या महेश्वरं ॥ शालग्रामशिलामेव नाक्षतैरर्चयेद्वि
जः ॥ अर्चयेद्यदि यो मोहात्स जातस्य तु निःफला ॥ मन्म
येभिन्नपात्रे च पाषाणे लोहकाष्ठजे ॥ पल्लवे करभस्यास्त
नैवेद्यं च न दापयेत् ॥ सौवर्णं रजतं ताम्रं कांस्यं पाला
शपत्रकं ॥ नैवेद्यायाज्यपात्रे च पात्रं विष्णोरतिप्रियं ॥
पवित्रं विष्णुनैवेद्यं सुरसिद्धर्षिभिः स्मृतं ॥ अन्यदेव

॥५०

॥५२॥

स्यनैवेद्यं भुक्त्वा चांद्रायणं चरेत् ॥ अग्राह्यं शिवनिर्मा
ल्यं पत्रं पुष्पं फलं जलं ॥ शालग्रामस्य संपर्कात् सर्वं या
ति पवित्रतां ॥ योर्चयेद्विधिवद्भक्त्या परान्नीते श्वसा
धने ॥ पूजायाः फलार्धमेवास्य न समग्रफलं लभेत् ॥
एकं विनायके दद्यात् द्वे सूर्ये त्रीणि शंकरे ॥ चत्वारि के
शवे देद्यात् सप्त शाल्के प्रदक्षिणं ॥ समभ्यर्च्य पिबेद्वौ दे
व्यः पादसलिलं हरेः ॥ स याति परमं स्थानं तद्विष्णोः
परमं पदं ॥ शालग्रामशिलातोयमपीत्वा यस्तु म
स्तके ॥ प्रक्षेपणं प्रकुर्वीत ब्रह्महा स निगद्यते ॥ विष्णु ॥५३॥

पादाभिषिक्तं यसात्रेणैव पिबेज्जलं ॥ सर्वपापविनि
र्मुक्तः सयातिपरमांगतिं ॥ यः पादसलिलं विष्णोः
करेण पिबते यदि ॥ समूढो नरकं याति यावदिंद्राश्च
तुर्दश ॥ अथ नित्यश्राद्धं ॥ तत्रेदं गृह्यसूत्रं ॥ यत्पि
तृभ्यो ददाति सपितृयज्ञ इति ॥ तथा च मनुः ॥ स्वाध्या
येनार्चयेत ऋषीन् होमैर्देवान्यथाविधिः ॥ पितॄन् श्रा
द्धेन नॄन्नन्नैर्भूतानि बलिकर्मणा ॥ कुर्यादहरहः श्रा
द्धमन्नाद्येनोदकेन वा ॥ पयोमूलफलैर्वापि पितृ
भ्यः प्रीतिमाहरन् ॥ एकमप्याशयेद्विप्रं पित्रर्थे पंच

धर्म०   श्रा०

यज्ञिके ॥ तच्चैवं श्राद्धमायेत्किंचिद्दैवं भवेदेवं प्रतिद्विजं ॥ २५ ॥ याज्ञवल्क्यः ॥ नित्यश्राद्धं देवहीनं नियमादि विवर्जितं ॥ दक्षिणारहितं चैव दातृ भोक्तृव्रतोज्झितं ॥ आवाहनं स्वधाकारं पिंडाग्नौ करणादिकं ॥ ब्रह्मचर्यादि नियमान्विश्वेदेवांस्तथैव च ॥ नित्यश्राद्धं त्यजेदेता भोज्यमन्नप्रकल्पयेत् ॥ भोक्ता भाजो किंचिदन्नं गोभ्यश्चैव निवेदयेत् ॥ नित्यश्राद्धमदैवं स्यादर्घ्यपिंडादिवर्जितं ॥ नामंत्रणं न होमं च नावाहनं न विसर्जनं ॥ श्राद्धादिनियमो नास्ति किंचिद्दत्वा विसर्जये ॥ १५१ ॥

तू ॥ षड्दैवसंभवेछ्राद्धं कर्तव्यं प्रसहं द्विजेः ॥ नित्सकर्मसमाप्याथब्राँह्मणश्रद्धयान्वितः ॥ अपसव्येनकर्त्तव्यंनित्सश्राद्धमदैवतं ॥ पितृनुद्दिश्यविप्रस्यभोक्तुमभ्यागतस्यच ॥ पादप्रक्षालनंकुर्यानामगोत्रंसमुच्चरन ॥ अर्चयेद्दासनंदत्वानमोवःपितरइति ॥ गंधपुष्पादिकंदत्वाभोजनान्नंपरिवेषयेत ॥ भोजनेसघृतंचान्नंगायत्र्याचाभिमंत्रयेत ॥ मंत्रेणेदंविष्णुरितिपितृभ्योविनिवेदयेत ॥ येचेहत्येतपार्वैवपितृणांस्तकेतिमाच्चरेत ॥ ब्रह्मार्पणंब्रह्महविरित्सुक्त्वाविनिवेदयेत ॥

धा० ५५

बाळः सुवासिनीवृद्धास्तथैवातुरकन्यकाः ॥ संभोज्यातिथिभृत्यांश्चदंपत्योःशेषभोजनं ॥ चित्राहूतीश्रद्धानांतंकृत्वाभोजनमाचरेत् ॥ संपन्नोब्राह्मणस्यापिभुंजीयात्सहबंधुभिः ॥ अथभोजनविधिः ॥ तत्रमनुः ॥ सायंप्रातर्द्विजातीनामशनंश्रुतिचोदितं ॥ नांतराभोजनंकुर्यादग्निहोत्रसमोविधिः ॥ गोभिलः ॥ ततोभोजनवेलायांकृत्वाचारंसदात्मवान् ॥ षोडशवर्गसमोपेतंभोजनंकारयेद्बुधः ॥ मातापितागुरुर्भार्यापुत्रोदासस्तथैवच ॥ अभ्यागतोतिथिश्चाग्निपोष्य

श्रा० ॥५५॥

वर्ग इति स्मृतः॥ स्मृतिसारसमुच्चये॥ प्राङ्मुखस्तु समश्नीयाद्धृति चावासमाहृतः॥ उत्तरे पित्तलस्येषु दक्षिणेन तु विवर्जयेत्॥ संग्रहे॥ आयुष्यं प्राङ्मुखो भुंक्ते यशस्वी दक्षिणामुखः॥ श्रीकामः पश्चिमे भुंक्ते न कदाचिदुदङ्मुखः॥ पुत्रवान्स्वगृहे नित्यं न श्रीयादुत्तरामुखः॥ सोमवारे तथा भार्गं वर्जयेत्तु सदा बुधः॥ अथ भोजनमंडलं॥ बोधायनः॥ चतुरस्रं त्रिकोणं च वर्तुलं वार्धचंद्रकं॥ कर्तव्यमानुपूर्वेण ब्राह्मणादिषु मंडलं॥ शंखः॥ आदित्या वसवो रुद्रा ब्रह्मा चैव पितामहः॥ मंडलान्युपजीवंति तस्मात्कुर्वीत मंडलं॥ पितामहः॥ यातुधानाः पिशाचाश्च ह्यसुरा राक्षसास्तथा॥

५७

॥५६॥

भ्रांतितचछि मन्त्रस्य मंडलेन विवर्जितं॥ अथ कांस्यपा
त्रं॥ एकएवतु यो भुंक्ते विमले कांस्य भोजने॥ चत्वारित
स्य वर्द्धंति आयुः प्रज्ञा यशोबलं॥ पलाशं शातिका द
र्वांगतउ र्ध्वं यथेच्छया॥ इदमेव गृहस्थानां नयति
ब्रह्मचारिणां॥ पंचार्द्रो भोजनं कुर्यात् ह्याहार्ष्वो मौन
मस्थितः॥ हस्तोपादौ तथा वास्य मेषु पंचाद्रता म
ता॥ पारणे तु हे तथा श्राद्ध वर्जये कांस्य भोजनं॥ मो
हाद्यो यदि भुंजीत हस्तं कर्म च निःफलं॥ भोजने त्र्या
द्यपत्रात्ति॥ रंभा कुडज मध्या म्रजं कपणेस सर्वपके न॥

५७

५६॥

पद्मोदुंबरपालाशाब्रह्मपत्रंपवित्रकं ॥ अथनिषिद्धा

नि ॥ वटार्काश्वत्थपर्णेषुकुंभीतिंदुकपर्णयोः ॥ को

विदारकदंबानांभुक्त्वाचांद्रायणंचरेत् ॥ करेकर्प

टकेचैवशिलायांताम्रभाजने ॥ भिन्नकांस्येचवस्त्रे

चनभुंजीयात्तथायसे ॥ रंगावलीदीपुरतःस्थाप्यमध्ये

त्रेपरिवेशयेत् ॥ परिषिंचंगायत्र्याघृतात्कमभि

मंत्रयेत् ॥ अन्नंमध्येप्रतिष्ठाप्यदक्षिणेघृतपायसं ॥

रंगावलीदिपुरतस्थाप्यभक्ष्यभोज्यंचवामतः ॥ पात्रं

५० ॥५७॥

ध्यत्वा तु वामेन याचेत्स्याद्भोजनं हितं तत् ॥ पाणिना
दक्षिणेनैव पर्युक्ष्य परिषेचयेत् ॥ अंगुष्ठतर्जनी
चैव मध्यमा च तृतीयका ॥ तिस्रो द्वे कांगुलिश्चैव
प्रशस्ता पात्रधारिणे ॥ प्रातः सप्तव्रतैर्नेति वारि
णा परिषेचयेत् ॥ सायंकाले तथैव स्यात् ऋतं त्वा
सत्येन तिच ॥ अन्नेनैव घृताक्तेन नमस्कारेण वै भु
चि ॥ तिस्र एवाकृतिर्दद्याद्भोजनादौ तु दक्षिणे ॥
सायणीये ॥ उध्दृत्य किंचिदन्नाद्यं धर्मराजाय वै ब
लिं ॥ दत्वाथ चित्रगुप्ताय प्रेतेभ्यः स्वेदमुच्चरेत् ॥ ॥

५० ॥५८॥

स्मृतिः॥ बदरीफलमात्रान्नमंगुष्टैर्भुवि क्षिपेत्॥
यमधर्माय चित्राय भूतेभ्यश्च ततो जलं॥ मनुः॥ द
त्वा तु चित्रगुप्ताय हस्ते च क्षालयेद्विजः॥ अक्षालित
करो भुंक्ते रौरवं नरकं व्रजेत्॥ चित्राहुतिरनुध्वस भुं
क्ते यो ग्रासपंचकं॥ अघं स केवलं भुंक्ते ज्ञानतोऽज्ञा
नतोपि वा॥ चंद्रिकायां॥ भोजनादौ बलि भुक्तः सम
ध्वस हि भोजनं॥ अनुध्वस ततो भुंक्ते प्राणायामादि
कं चरेत्॥ उक्त्वा मन्त्रोपस्तरणमसि स्वाहांतमुच्चरेत्॥
अपोशानमिति प्राहुर्भोजनादौ पिबेज्जलं॥ आपो

५०

शानमह्नत्वातुयो भुंक्ते द्विजसत्तमः ॥ अभोज्यंतभ्र

॥५८॥ चेदत्तं भुक्त्वाचांद्रायणंचरेत् ॥ आपोशानंकरेहृत्वा

पात्रं हृत्वाति लोदकं ॥ ध्यानमूत्रसमंतोयंपुनःपुर

यत्नेयदि ॥ आपोशानार्थयत्तोयं धृतं येन्निस्रतंय

दि ॥ हस्तप्रक्षालितंतोयेनपुनश्च धारयेज्जलं ॥ आ

पोशानकरोविप्रोयद्यान्नीर्वचनंपठेत् ॥ अभोज्यं

तभ्रवेदन्नेदाताभवतिकिल्बिषि ॥ यजमानकृतं

पापमन्नमाश्रित्यतिष्ठति ॥ अन्नेनपरिगृह्णीयात

श्लोकः कंरगतेरपि ॥ अन्नंब्रह्मारसोविष्णुर्भोक्ता ॥५८॥

देवो महेश्वरः ॥ एवं ध्यात्वा द्विजो भुंक्ते आन्न दोषैर्न लि
प्यते ॥ प्राणाहुतिरहुत्वा तु पश्चात्तं परिमर्दयेत् ॥ म
र्दितं भोजयेद्यस्तु भुक्त्वा चांद्रायणं चरेत् ॥ घृतहीनं
तु यो भुंक्ते नरस्त्वाहुतिपंचकं ॥ पश्चाद्धुते नु यो भुंक्ते द्वि
जश्चांद्रायणं चरेत् ॥ अभ्युक्ष्य सर्पिषैकैकां प्राणाना
मेव चाहुतिं ॥ संगृह्य विधिना मंत्रैर्हुनेत् प्राणादिपंच
के ॥ प्राणाहुतिनियमः ॥ स्मृतिसारसमुच्चये ॥ तर्ज
नीमध्यमांगुष्ठैः प्राणस्यैवाहुतिर्भवेत् ॥ मध्यमा
नामिकांगुष्ठैरपाने चाहुतिं क्षिपेत् ॥ कनिष्ठानामि

कांगुष्ठेर्ध्यी नाया मुकुर्याद्बुधः॥ तर्जनीतु बहिःकृत्वा ऊर्ध्व
नेजुकुर्याद्भुविः॥ सर्वांगुलिभिराद्यायसमानस्याकृति
र्भवेत्॥ अनेन विधिना विप्रोवाग्यतो भोजनं चरेत्॥ जि
वमित्रकस्य भोजने मौन निषेधः॥ स्मृतिचंद्रिकायां॥
कनियान्सपिताचैवमुक्त्वा श्राद्धिक भोजनं॥ प्राणाग्नि
होत्राद न्यत्र न समौनं समाचरेत्॥ यदि भुंजीत वैत्क
श्चि सर्वत्रैव तु भोजने॥ सपापः पितरं हंति भ्रातरं सं
ततिं श्रुवं॥ भोजनं श्राद्धिकं मुक्त्वा कनियान्सपितापिच॥
मौनं भोजनपात्रस्य धारणं परिवर्जयेत्॥ पंचप्राणा

१=वाग्यतो भोजनं कुर्याद्गृहस्थः ब्रह्मचारी संदेवहि॥=

॥५२॥

कृतिर्कृत्वा ब्रह्मग्रंथिविमुत्सृजेत्॥ अक्षाल्य वामहस्तंच पश्चा
द्भोजनमाचरेत्॥ तर्जन्यांतु स्थितेशेष्ये ब्रह्मग्रंथोच मूर्
र्धनि॥ कनिष्ठिकांस्थितरवङ्गेनेव भोजनमाचरेत्॥ कृ
त्वाप्राणाकृतिरन्नंकिंचिद्दस्थापयेत्स्थक॥ मद्यावाइस्पि
तराघं स्थितमंतेतु भोजयेत्॥ अनिधायपथक्नंगा
यत्र्याद्यभिमंत्रितं॥ पुनरन्नंनभोक्तव्यंयादिभुंजीतकि
ल्बिषी॥ मनुः॥ मधुपर्केचसोमेचयचसु प्राणाहुतीषुच॥
आस्यहोमेषुसर्वेषु नोछिष्टंमनुरब्रवीत्॥ दक्षिणंतुप
रित्यज्यवामेनोरंनिधापयेत्॥ अभोज्यंतद्भवेदन्नंपानी
यंचसुरासमं॥ जलपात्रं तुनिक्षिप्यमार्गवंधेचदक्षिणे॥

स

५१०

॥५०७॥

भुक्तकाले तु विप्रो वै पिबेदन्यत्र पाणिना ॥ एकपंक्त्युपविष्टा
नां विप्राणां सह भोजने ॥ यद्येकोपि त्यजेत्पात्रं शेषमन्नं न भो
जयेत् ॥ भुंजानेषु तु विप्रेषु योग्रे पात्रं विमुंचति ॥ स मूढो
नरकं याति ब्रह्महा स च जायते ॥ अग्निना भस्मना चैव स्तं
भेन सलिलेन वा ॥ अंतरद्वारदेशे तु पंक्तिदोषो न विद्यते ॥
एकपंक्त्युपविष्टानामन्योन्यस्पृष्टे यदि ॥ भुक्त्वा तदन्नम
साध्यं गायत्र्याष्टशतं जपेत् ॥ स्मृतिः ॥ भवेदुच्छिष्टसंस्पर्शो
भोक्तुर्वा भोजनस्य वा ॥ अन्नं तदेव भोक्तव्यं न त्याज्यं भोज
ने स्थितं ॥ पुनरन्नं न भोक्तव्यं यदि भुंजीत किल्बिषी ॥ तत

५१०

॥६१॥

द्वि-रोरवे॰पुण्यानिलयेपञ्चार्बुदनिवासिनां॥ अर्थिनामुदकंदत्तमक्षय्यमुपतिष्ठतु॥

श्चैवजपेद्देवींद्वात्रिंशत्तमष्टोत्तराधिकं॥ शेषमुद्धृत्तमोक्तव्यंश्र
यतामत्रकारणं॥ ततोदद्यादन्नशेषंभूमौदुर्गतिस्तस्ये
भक्ष्यापीत्वातुयस्मात्त्रैरिक्तंसजतियोनरः॥ सनरःक्षुत्पि
पासार्त्तोभवेज्जन्मनिजन्मनि॥ यत्रक्वचनसंस्थानांक्षु
त्तृष्णोपहतात्मनां॥ दुर्गतीनामयादत्तमक्षय्यमुपतिष्ठ
तु॥ अर्घ्यंपिबतिगंडूषमर्घ्यंसजतिभूमिषु॥ प्रीणं
तिपितरस्तस्ययोग्यान्योभूमिदेवताः॥ यत्रक्लिष्टेदनादं
तोभुंक्तवानासनाद्द्विजः॥ सघस्नानंप्रकुर्वीतनान्यथा
प्रयतोभवेत्॥ अंगिराः॥ उच्छिष्टोच्छिष्टसंस्पृष्टःशुना
शूद्रेणवाद्विजः॥ उपोष्यरजनीमेकांपंचगव्येनशुध्य

॥६१॥

ति ॥ भ्रांतं च शूद्र मुच्छिष्टं ह्यनुच्छिष्टस्तु यस्य रोत्तृ ॥ स्ना
नं विधीयते तस्य पात्राणां चालनं विना ॥ स्मृति ॥ गंडू
षकरणात्पूर्वं हस्तेनाक्षालयेद्द्विजः ॥ कृतं दैवं वापि श्राँ
च ह्यात्म न श्रो पघातकः ॥ गौतमः ॥ यो वै गंडूषसमये
तर्जन्यां वक्त्रचालनं ॥ कुर्वंति यदि मूढात्मा रौरवं नरकं व्र
जेत् ॥ आचांतोप्यशुचिस्तावद्यावत्पात्रमनुद्धृतं ॥ उ
द्धृतेप्यशुचिस्तावद्यावद्भूमिर्नमार्जिता ॥ रात्रौ भोज
नकाले तु यदि दीपो विनश्यति ॥ पात्रं धृत्वा तु पाणि
भ्यां गायत्रीं मनसा स्मरेत् ॥ दृष्ट्वा स तु पुनर्दीपं तत्रे

॥६१॥

षं भोजयेन्नरः॥ पुनरन्नं न भोक्तव्यं यदि भुंजीत किल्बि
षी॥ परपाकनिवृत्तस्तु परपाकरतस्तु यः॥ तयोर
न्नं न भोक्तव्यं भुक्त्वा चांद्रायणं चरेत्॥ परपाकनिवृत्त
स्तु वर्षं वर्षार्द्धमेव वा॥ यान्वयेच्छ्रोत्रियस्यान्नं तदभा
वे जलं पिबेत्॥ श्रोत्रियाचार्यशिष्याश्च कुशातिश्व
शुरमातुलाः॥ तेषामन्नं न दुष्येत तद्ध्युपाध्यायस्य चैव
हि॥ अथ निषिद्धान्नं॥ प्रयोगपारिजाते॥ प्राण्यंग
मामिषं चूर्णं क्षारनालिकमामिषं॥ मसुरामामिषं धा
न्ये फले जंबीरमामिषं॥ गोवर्जमामिषं क्षीरं चर्मण्यु

धा० ॥६२॥

प्र०

दकमामिषं ॥ साक्षाद्गाम्निदुग्धं स्वयंपक्कं आमिषं चाष्टकं स्मृतं ॥ आमलकादिसंयुक्ते नौकायां न निषेधः ॥ ब्रह्मौदनेन तथा चोल्लेसी मंते प्रथमार्तवे ॥ मासिके च तथा कृच्छ्रे नैव भोजनमाचरेत् ॥ गणान्नं गणिकान्नं च सूतकान्नं तथैव च ॥ यस्तन्नं चैव शूद्रान्नं नाश्नीयाद्द्विजसत्तमः ॥ नग्नश्राद्धे नवश्राद्धे संपिंडीप्रेतकर्मसु ॥ प्रायश्चित्ते न भुंजीत भुक्त्वा चांद्रायणं चरेत् ॥ तिथिपर्वेषु वर्ज्यं ॥ सप्तम्यां रविवारे च दिवारात्रौ तथैव च ॥ धात्रीफलं नरो नाश्नीयाद्दलक्ष्मीकामो भवेद्ध्रुवं ॥ कू

२ ॥६२॥

भांडंतरणी चैव मूलकं वृहतीं तथा ॥ श्रीफलं च कलिंगं च धात्रीं प्रतिपदादिषु ॥ क्षिरः कपालं मांत्राणि नरव चर्म तिलांस्तथा ॥ यदिच्छेदूर्ध्वगामित्वमष्टम्यादिषु वर्जयेत् ॥ वर्जयेच्छ्वेतवंताकं अलाबुं वर्तुलं तथा ॥ छत्राकं लशुनं चैव ह्युषितं मसुरं तथा ॥ वंताकं स्थूलकालिंगं बिल्वोदुंबरभिःसरा ॥ एतानि सेवते यस्तु तस्य दूरतरो हरिः ॥ निषिद्धान्नेप्रायश्चितं ॥ यसन्नं तु यदा भुंक्ते पात्र गंत्रेति गंतथा ॥ पर्वतश्च जपेन्नि संरूातवारंनकल्मषं ॥ समानमुसमंत्र च सहस्रं तु जपेद्यदा ॥ भुंक्ते प्रमादाद्

५०

प्रपति

॥६२॥

द्रं नं तदा दोषात्प्रमुच्यते ॥ प्रमादाज्ञानतो भुंक्ते गणान्नं
तु यदा नदा ॥ अस्त्वेवं सुं जपेन्मंत्रं सहस्रं वैन कल्मषं ॥ य
ज्ञाय ज्ञात्वा यः सूक्तं जपेदा ख्यांतले पि वा ॥ गणिकान्नं
यदा भुंक्ते तदा पापात्प्रमुच्यते ॥ अन्नं भुंक्ते यदा यस्तु
सुवर्णस्तेय मंदिरे ॥ इंद्रानुपूर्वेण सूक्तं सहस्रं वै ज
पेज्जले ॥ स्तोत्रमिंद्रो जपेन्मंत्रं शतवारं जलेपि वा ॥ कु
ण्डपन्नं वापि यो भुंक्ते विमुच्येत सकल्मषात् ॥ ब्रह्मघ्न
स्य गृहे भुंक्ते किल्बिषान्मुच्यते सदा ॥ एहि वा अजपे
त्सूक्तं सहस्रं तु जपेत्तु यदा ॥ य एनं प्रजपे त्सूक्तं सहस्र

॥६३॥

विष्णुमंदिरे ॥ पापात्प्रमुच्यते स सं भुंक्ते गेहे सुरापिनः ॥
मुच्यते प्रजपेत्सूक्तं शिवस्थाने सहस्रकं ॥ तस्य कस्य
गृहे भुंक्ते त[illegible]दा पापात्प्रमुच्यते ॥ मानो वृकाय वर्गं च
शतं विष्ण्वालये जपेत् ॥ भुंक्ते नंद्धे षिरंगोयस्तु तदा पा
पात्प्रमुच्यते ॥ आयुर्वातो जपेद्वर्गं शतवारं जलेय
दा ॥ दीर्घरोगीगृहे भुंक्ते तदा पापात्प्रमुच्यते ॥ कुवेगे दे
विवर्गं च बदर्यां वै जपेच्छतं ॥ पिशुनस्य गृहे भुंक्ते मुच्य
ते कल्मषात्तदा ॥ अपेहीति जपेत्सूक्तं श्राद्धे भुंक्ते तु षो
डश ॥ तदा पापात्प्रमुच्येत त्रिंशद्वारं जले स्थितः ॥ वि

धौ० ॥६४

श्राद्धे हुते जपेत्सूक्तं सपिंडीभोजने जले ॥ प्रेतस्थाने यवा
न्ये भुक्त्रिंशद्वारं न कल्मषं ॥ अनुमासिकेषु यो भुंक्ते यद्वा
पापात्प्रमुच्यते ॥ अश्वाब्द वजपेन्मंत्रं दशवारं जलेयदा ॥
नित्यश्राद्धे यदा भुंक्ते तस्मात्पापात्प्रमुच्यते ॥ अशद्ववज
पेन्मंत्रं दशवारं न संशयः ॥ सीमंते च यदा भुंक्ते मुच्यते
किल्बिषात्तदा ॥ सूर्येनोत्तभितामंत्रं जपेदष्टशतानि
धौ ॥ उत्सवेषु यदा भुंक्ते मुच्यते पातकात्तदा ॥ क्षेत्रखाने रोज
पेत्सूक्तमेकवारं अशास्तकं ॥ मन्वादिश्राद्धे यो भुंक्ते कल्म ॥६४॥
षैर्नैव लिप्यते ॥ कृतेन कृतयत्सूक्तमेकवारं जपेद्बुधः ॥

३०

युगादि श्राद्धे यो भुंक्ते तद्दापापा त्प्रमुच्यते ।। सैम्मनूनं
जपे त्स्त्रक्ते ह शवारं ञि वालये ।। भुंक्ते यो न्वष्टका श्रा
द्धे तद्दापापा त्प्रमु च्यते ।। लेषंगणं जपेन्मंत्रं दद्दावै विष्णु
मंदिर ।। दिवाद्धि भोजने भुक्त्वा किल्बिषात्तु विमुच्यते ।
बायोयतेजपेन्मंत्रं दशावै विष्णु मंदिरे ।। व्यतिपातेय
दा भुंक्ते तद्दापापा त्प्रमुच्यते ।। तेअप्रेष्टाजपेन्मंत्रंद
शवारं शिवालये ।। रात्रौदि भोजनं चेत्स्यात् कल्मषं नै
व सर्वदा ।। भिमातुर्घोजपेन्मंत्रं शतवारं शिवालये ।
भार्यया सह यो भुंक्ते तस्माद्दोषाद्दिमुच्यते ।। आपये

स्कै जपेन्मंत्रं शतं वै विष्णुमंदिरे ॥ हस्तादत्तं यदा भुंक्ते तदा
पापात्प्रमुच्यते ॥ अवैते हे ळोहस्य भ्यां सर्वपापैः प्रमु
च्युते ॥ इळ्ळे अग्निं जपेन्मंत्रं शतवारं यदा तदा ॥ पंच
यज्ञविहीनस्य गृहे भुंक्ते न पातकं ॥ बहुवश्चैकपात्रे
षु भुंजते वै न कल्मषं ॥ कुबाध्याः का जपे मंत्रं दशवा
रं न किल्बिषं ॥ श्वानादि दर्शनं हूत्वा पश्चात् भुंक्ते यदा
तदा ॥ उद्धृतं मं जपेन्मंत्रं दशवारं न किल्बिषं ॥ रजस्त्री
णां ध्वनिं श्रुत्वा पश्चात् भुंक्ते न कल्मषं ॥ अग्निश्चेमं
जपेन्मंत्रं दशवारं विशेषतः ॥ अंत्यजानां ध्वनिं श्रुत्वा ॥६५॥

पश्चाद्भुंक्तेनकल्मषं॥अग्नेभरुद्भिर्मंत्रंवाकिल्बिषंन
शतंजपेत्॥एकस्येवनभोक्तव्यमन्नंवैश्यसहद्विजः॥
अज्ञानाद्यस्तुभुंजीततस्यवैनास्तिनिष्कृतिः॥वमन
विधिः॥उत्तराचमनात्पूर्वंवमनंयदिजायते॥स्ना
नंतत्रनकर्त्तव्यंगंडूषैःशुद्धिरिष्यते॥उत्तराद्वमनंपी
ताकुरुतेवमनंयदि॥तत्रस्नानेनशुद्धिस्यादितिश्रा
ङुर्मजीविलः॥सर्वत्रवमनेस्नायात्तथान्रो॥काश्रु
पातने॥अन्नंभुक्त्वार्द्रपाणिश्चदंतान्नस्नानमाच
रेत्॥तांबूलं॥तांबूलंखादयेद्भुक्त्वारात्रौचैव

६०

॥६६॥

तुसर्वदा ॥ अभ्यंगे चैव मांगल्ये दिवावाप्यथवानिशि ॥ प्रातःकाले फलाधिक्यं फलाधिकं तु मध्यतः ॥ पर्णाधि क्यं भवेद्रात्रौ लक्ष्मीवान् स नरो भवेत् ॥ पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसंभवः ॥ चूर्णपर्णं हरेत्यायुः शिराबुद्धि विनाशयेत् ॥ मूलं च मध्यं परिसज्य शिरांश्चैव परिसजे त् ॥ सचूर्णं खादयेत् सर्वमायुः श्रीकीर्तिमान् भवेत् ॥ अनिधाय मुखे पर्णं पुंगं च खादति यो नरः ॥ सप्तजन्म दरिद्रः स्यादंते न स्मरते हरिं ॥ पंच सप्ताष्ट पर्णानि दशाष्टादशवापि च ॥ दद्यात्स्वयं च गृह्णीयादिति केचि

६०

॥६६॥

दुदीरितं ॥ तर्जन्यां चूर्णमादाय तांबुलं न तु खादयेत् ॥
यदि वा खादये मूढो नरकं प्रतिपद्यते ॥ मध्यमांगुलि
नादाय चूर्णं पत्रस्थले पयेत् ॥ अंगुष्ठेनाथवा चैव वि
धाणमेव निर्णयः ॥ मत्तारोगे चेत्तथा श्राद्धे मातापित्रो
र्मृतेहनि ॥ उपवासे च तांबुलं दिवा रात्रौ विवर्जयेत् ॥
पक्ष श्राद्धे तथा द्वेर्युगमन्वंतरादिषु ॥ श्राद्धं निर्वर्त्य भु
क्त्वा च तांबूलं खादयेद्द्विजः ॥ मोहाद्दत्वाथ श्राद्धे तांबू
लं यदि खादयेत् ॥ श्राद्धहंता भवेत्स च रौरवं नरकं व्र
जेत् ॥ अथ सायंकर्म विधिः ॥ रवेरस्तमयात्पूर्वं घटि

...सुखो दीनो धन...रस्याद् दुःखमुखः ।। ...सत्सुखे तु दुःखदो हानिदो दक्षि-

के कार्यदा भवेत् ।। सायंसंध्यामुपास्याथ कुर्याद्दीपं च

पूर्ववत् ।। रवेरस्तं समारभ्य यावत्सूर्योदयो भवेत् ।।

यस्य तिष्ठेद्गृहे दीपं तस्य नास्ति दरिद्रता ।। छ ।। ।

।। इति श्री नारायणविरचितायां धर्मप्रवृत्तौ आ-

ह्निकप्रकरणं समाप्तमस्तु ।। ।। अथ शयनविधिः

स्वगृहे प्राक्छिरः कुर्यात् ...श्वसुरे दक्षिणामुखः ।। प्रत्य-

ङ्मुखः प्रवासे च न कदाचिदुदङ्मुखः ।। तृणे देवाल-

ये चैव पाषाणे चैव पल्लवे ।। अंगणे द्वारदेशे तु मध्य-

भागे गृहस्य च ।। रिक्तभूमौ तथा लोष्टे पार्श्वे चोच्छि-

ष्टसंन्निधौ ॥ शून्यालये श्मशाने च वृक्षमूले चतुष्पथे
॥ माता वा भगिनी वापि तथा चान्यस्त्रियोपि वा ॥ एते
षां सन्निधौ चैव न स्वपे ब्राह्मणः क्वचित् ॥ चंदनेनानु
लिप्तांगो धृत्वा पुष्पाणि दंपती ॥ तांबूलं चर्वणं कृत्वा
प्रदीपे मैथुनं चरेत् ॥ दीपे नष्टे तु यः संगं करोति मनु
जो यदि ॥ यावज्जन्म दरिद्रत्वं जायते नात्र संशयः ॥
पादलग्नतनुश्चैव चक्षुष्पृष्टं ताडनं तथा ॥ कोपं रोषं च
निर्लज्जं संयोगे च न दोषभाक् ॥ अत्र कश्चिद्विशेषो लि
ख्यते ॥ ऋतुमत्यां तु भार्यायां तत्र संगादिकं चरेत् ॥

अनर्तुमत्यां भार्यायां न संगमितिकेचन॥ गर्भाधाना
गमृतं च यत्कर्म कुर्याद्द्विदैवहि॥ रात्रौ कुर्याद्विधानेन
गर्भबीजस्यरोपणं॥ मंत्रादिकं ततः कृत्वा योनिं प्रक्षा
लयेज्जलैः॥ पूर्वं रात्रे व्यतीते तु संगच्छेद्रतिमंदिरं॥
पादौ प्रक्षालयेत्पूर्वं पश्चाच्छय्यां समाविशेत्॥ मृदु
शय्यास्थितः श्वेतेरिक्तशय्यां परिसजेत्॥ उपानहो
वेणुदंडं बुपात्रं तथैव च॥ तांबुलादिनि सर्वाणि स
मीपेस्थापयेद्गृही॥ कुंकुमं चांजनं चैव तथा हारिद्र
सिंदुरं॥ धौतवस्त्रं च तांबूलं संयोगं च शुभावहं॥

भर्त्तुःपादौ नमस्कृत्य पश्चाच्छय्यां समाविशेत्॥ सा नारी सुखमाप्नोति न भवेद् दुःखभागिनी॥ स्वपेत् स्त्रीशिरःकृत्वा श्रसक्यादीश्रसारयेत्॥ तांबुलचर्वणं दत्वा सकामो भार्ययासह॥ तांबुलेन मुखं पूर्णं कुंकुमादि समन्वितं॥ श्रीतमाल्हादसंयुक्ते कृत्वा योगं समाचरेत्॥ विना तांबुलवदनं न गामी कांत रोचकं॥ दुर्मुखां च क्षुधायुक्तां संयोगे च परिसज्जेत्॥ भुक्त्वानुप निषत्स्तु शय्यायामभिसंमुखः॥ संस्मृत्य परमात्मानं पत्न्या जंघे प्रसारयेत्॥ अंगामर्दं च सुदृढामनोद्रौ सुमनो

हरं॥ योनिस्पृष्ट्वा जपेत्सूक्तं विष्णुर्योनिंप्रजा भते॥ यो
निंपश्यन्जपे मंत्रं मनसुनीतपुनस्तितित्रि॥ भत्सदृशो भवेसु
त्रइतिमत्वास्मरेद्धरिं॥ ओष्ठाविवजपे मंत्रं मन्सोन्यम
वलोकयेत्॥ स्तनौ धृत्वानुपाणिभ्यां अन्योन्यं चुंबयेन्मुखं॥ बलं धेहीतिमंत्रेणयोन्यां शिश्नंप्रवेशयेत्॥ यो
नेस्तु किंचिदधिको भवेल्लिंगोबलान्वितः॥ संतुष्टो भा
र्यया भर्ता भर्त्रा भार्या तथैव च॥ यस्मिन्नेव कुले नित्यं
कल्याणं तत्रवै ध्रुवं॥ संभोगेन्वेव भार्यायाः सुदृढः स्थी
रबीर्यवान्॥ स्तनौ बाधकरि धृत्वा यथेष्टं मैथुनं चरे

त्॥ इच्छापूर्णं भवेद्यावद्भयोः काममयुक्तयोः॥ रेतः सिंचे
त्ततो योन्यां तस्माद्गर्भं विभर्ति सा॥ ऋतुकालोपगामी तु
प्राप्नोति परमां गतिं॥ सत्कुलश्च भवेत्पुत्रः पितॄणां स्वर्ग
दो भवेत्॥ ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति॥
घोरायां भ्रूणहत्यायां पितृभिः सह मज्जति॥ ऋतुस्ना
तां तु या नारी पतिं नैवोपविंदति॥ शुनी वृकी शृगाली स्या
त्सूकरी च पुनः पुनः॥ कामयज्ञ इति प्रोक्तं गृहिणां भवस
र्वदा॥ अनेन लभते पुत्रं संसारार्णवतारकं॥ तात भाव

९८

शुचिस्यातां दंपती मैथुनं गते॥ शयनादुत्थिता नारी शु

चिस्मात् भुवि पुमान् ॥ ऋतौ तु गर्भशंकित्वात्स्नानं मैथुन
तः स्मृतं ॥ अनृतौ तु यदा गच्छेच्छौचं मूत्रपुरीषवत् ॥ इति
गर्भाधानप्रसंगेन कथितं ॥ पुंसवनादयः क्रिया अपि क
थ्यते ॥ तत्रेदं गृह्यं ॥ उपनिषदि गर्भलंभनं च पुंसवनमन
वलोभनं च यदि नाधियात् तृतीये गर्भमास इति ॥ तथा
च कारिका ॥ तृतीये गर्भसंस्कारं मासि पुंसवनं भवेत् ॥
आद्येन गर्भेन विज्ञातं तृतीये मासि वै यदि ॥ चतुर्थे ग
र्भमासे सीमंतोन्नयनं षष्ठाष्टमयोर्वेति सूत्रं ॥ कारि
का ॥ चतुर्थे गर्भमासे तु सीमंतोन्नयनं भवेत् ॥ पूर्व

॥७॥

स्यासंभवेषष्ठेमासेयद्वाष्टमेभवेत्॥ तथाचस्मृतिः॥
आधानादष्टमेमासे सीमंतोन्नयनंभवेत्॥ नवमेमा
सिवाकुर्याद्यावद्गर्भविमोचनं॥ अयोगपारिजाते॥
सीमंतोन्नयनस्योक्तास्तिथिवासरराशिषु॥ पुंसवनंका
रयेद्विद्वान्मासेहे वैकदिनेथवा॥ अन्नप्राशनांताः॥ सर्वा
गर्भाधानादिकाः क्रियाः॥ उक्तकालेभवेत्सेताद्दोषोना
शात्पुष्ययोः॥ मासप्रयुक्तकार्येषुमुटसंगुरुशुक्रयोः॥
नदोषकृद्यदामासोलक्ष्मणोबलवानिति॥ पूर्वस्मिन्दि
वसेपत्नीहविष्यैकाशनाभवेत्॥ वृद्धिश्राद्धंपतिःकुर्या

५०

३१

ब्रह्मचारी भवेत्तदा ॥ तथा च स्मर्यते ॥ पुंसवने च सीमं
ते तथा चोलोपनायने ॥ गोदाने स्नान नुद्वाहे नांदी श्रा
द्धे पुरो दिने ॥ अथ गर्भिणीधर्माः ॥ भूम्यां चैवोद्वनी
चाया भारोहणं वरोहणे ॥ नदी प्रतरणे चैव नाक दारोह
णं तथा ॥ उग्रौषधं तथा क्षारं मैथुनं भार वाहनं ॥ वृत्ते
पुंसवने चैव गर्भिणी परिवर्जयेत् ॥ अथ गर्भिणीपति
धर्माः ॥ पुंसो भार्या गुर्विणी यस्य चासौ सूनो श्वौरं क्षौ
र कर्म मनश्च ॥ गेहारंभ स्तंभ संस्थापनं च वच्छि स्ना ॥ ६१ ॥
नं दूरयात्रां न कुर्यात् ॥ वाहनं दहनं चैव वपनं सिंधुद

५०

गर्भिण्यामासनः ५ स्वापवनं परिवर्जयेत् ॥ कारयेच्छ्रद्धियो प्रो
तासे [illegible] चणा हाभवेत् ॥

दर्शने ॥ पर्वतारोहणं चैव न कुर्याद्गर्भिणीपतिः ॥ मा
सात्तु पंचमादूर्ध्वं निंदिता बहुदोषकृत् ॥ पंचमासात्प
रीसाज्याः कुर्वंति मस्रुवे वहि ॥ दक्षः ॥ के तु द्वये व्यतीते
तु न कुर्यान्मौंजिबंधनं ॥ अग्न्याधानं गया श्राद्धं वपनं
तु विवर्जयेत् ॥ गर्भिण्यामपि भार्यायां सूनोर्मौंजीं न का
रयेत् ॥ इस्मृतौ पंचमादूर्ध्वमधो मासाच्छुभप्रदं ॥ यस्या
न्या गर्भिणी भार्या पंचमासात्परेऽपि वा ॥ भिन्नभार्यासु
तस्येह न दोषश्चौलकर्मणि ॥ सूनोर्मातरि गर्भिण्यां
न्कउाकर्म च वयस्यवे ॥ ऊर्ध्वं तु पंचमासान्न कुर्यान्मौंजि
मा

५०

॥७२॥

बंधनं॥अष्टमासात्परश्चैवनकुर्याच्छ्राद्धमेजनं॥
रमश्चकर्मतथाच्चैवकेचिदाकुर्मनिषिधिणः॥अथजात
कर्म॥कुमारजातःपुत्रान्यैरालंभादिति॥तथाच॥जा
तेसुतेपिताकुर्यात्स्नात्वाश्राद्धंविधानतः॥जातकर्मततः
॥कुर्यादन्यैरालंभनासुरा॥हेमाद्रौ॥जातःपुत्रस्तवा
घेतिश्रुत्वातस्मैसुहृत्सृपयेत्॥पारितोषकमिस्यर्थंभुष
णाच्छादनादिकं॥देवाश्चपितरश्चैवपुत्रेजातेद्विजन्म
नां॥आयांतितस्मात्तद्देहःपुण्यपूज्यंचसर्वदा॥जाते
सुतेवगाह्यायःश्राद्धंकृत्वाविधानतः॥जातकर्मवि

५०

सं०

॥७२॥

इति

धानेन कुर्याद्दानादिकं ततः ॥ तत्र दद्यात्सुवर्णं च भू
मिं गो तुरगाद्यर्थं ॥ छत्रं छागं च माल्यं च शयनं वसनं
गृहं ॥ यावन्नाच्छिद्यते नालं तावद्दद्यात्स्वशक्तितः ॥
आशौचेपि प्रकर्त्तव्यं ग्रहणेपि यथाविधि ॥ आशौ
चे पूर्वाशौचे च जातके वास [illegible] सपि जातकर्म कर्त
व्यमेवेत्यर्थः ॥ ऋणत्रयनिर्वृत्यर्थं दद्याज्जाते सुते पि
च ॥ ब्रह्मसूत्रं धृत नालं तेनावेष्ट्य निकृंतयेत् ॥
स्वधृतेन ब्रह्मसूत्रेण नालं आवेष्ट्य छिद्यादित्यर्थः ॥
जातसूतके कर्त्तव्यता ॥ निबंधसारे ॥ जातादिषं

५०

॥८३॥

मध्यस्थेनिर्ऋत्यैबलिमाहरेत्॥ अर्चयेद्दशदिक्पालान्
गीतवाद्यैर्हासरम्यकैः॥ सूत्वागारं दीपैः सूत्रैश्च ॥२
शांतिपाठकैः॥ द्वारेद्वितीयभागेतु पुत्तलंश्वापि
कंन्नरैः॥ अथमेदिवसेषष्ठेदशमेचैवसर्वदा॥
त्रिष्वारोगोचंनकुर्वीतसूतकेपुत्रजन्मनि॥ दद्या
तुप्रथमेदानंषष्ठेवापंचमेपिवा॥ दशमेबलि
दानंस्याद्‌अन्नदानंतथैवच॥ अथनामकरणं॥
तत्रकारिका॥ द्वादश्यांनामकरणंनांदिश्रा

१०

॥८३॥

ढ्ढरते भवेत्॥ पुंसां युग्माक्षराणि स्युर्विपरीतानि योषितां॥ ग्रंथांतरे कानिचिद्वचनानि लिख्यंते मनुः॥ नामधेयं दशम्यां तु द्वादश्यां वापि कारयेत्॥ पुण्ये नक्षत्रदिवसे मुहूर्ते वा गुणान्विते॥ वसिष्ठः॥ द्वादशे षोडशे विंशे द्वाविंशे दिवसे पि वा॥ नामकर्म द्विजातीनां कर्तव्यं श्रुतिचोदनात्॥ द्वाविंशाद्दिवसादूर्ध्वं यावत्संवत्सरं भवेत्॥ नाम कूर्मे द्विजैः कार्यमिति केश्चिदुदीरितं॥ आवत्सरं नैव दोषो मलमासो गुरुशुक्रयोः॥ मलमासे पितृकुर्या

५०

दुक्तकालेनदोषहृत् ॥ अथपत्नीकुमारोपवेशनंकृ
थ्यते ॥ अयोगयाशिजाते ॥ संस्कार्यः पुरुषोवापिस्त्री ॥७४
वादक्षिणतः सदा ॥ संस्कारक [illegible] स्तु सर्वत्रतिष्ठेदु
त्तरतः सदा ॥ तथाचस्मृत्यंतरे ॥ जातके नामके चैव
ह्यंनप्राशने कर्मणि ॥ निष्क्रमणेचचौलेचपत्नीपुत्र
स्तुदक्षिणे ॥ गर्भाधानेपुंसवनेसीमंतोन्नयनेतथा ॥
वधूप्रवेशनेचैवपुनःसंधानएवच ॥ पूजनेमधु
पर्कस्यकन्यादानेतथैवच ॥ कर्मस्वेतेषुवैभार्या
दक्षिणेतूपवेशयेत् ॥ कन्यापुत्रविवाहेचगोदाने ॥७५॥

१०

व्रतबंधने ॥ आशीर्वादेभिषेके च पत्नी तूत्तरतो भवेत् ॥ वापीकूपतडागानां प्रतिष्ठायां महोत्सवे ॥ व्रतादौ रंगातिके चैव पत्नी स्याद्दुत्तरे सदा ॥ रंगातिकेषु च सर्वेषु प्रतिष्ठोद्यापनादिषु ॥ वामे तु पत्निरोसत्नी व्याघ्रस्य वचनं यथा ॥ अथ निष्क्रमणं ॥ चतुर्थे मासि [illegible] निष्क्रमणं पूर्वपक्षापरपक्षाविति वा शुभे नक्षत्रे इति सूत्रं ॥ अथ कारिका ॥ चतुर्थे मासि पुण्यर्क्षे शुक्के निष्क्रमणं भवेत् ॥ स्नानं स्वलंकृतं चाभिहितं स्वस्त्ययनं शुभं ॥ तथा च ज्योतिः ॥ ग्रहान्निष्क्रमणं सुनोश्चतु

श्रीहि श्यामाकगोधूममाषमुग्धतिलायवाः एषमुपरि तानीं निधाय तैः प्रकल्पयेत् ॥

र्थे मासि कारयेत् ॥ यात्रोक्तसमये मासी त्ततीये अथमे पिवा ॥

॥७५॥

अथ पंचमास कर्त्तव्यता ॥ पंचमे मासिकर्त्तव्यं कुमार

शुकर

स्सप वेशनं ॥ संपूज्य वराहं भूमिं कुमारं चोपवेशयेत् ॥

पूजनं पूर्ववद्दत्वा गुरुर्देवद्विजन्मनां ॥ भूमि भागमथो

लिप्य हृत्वा तत्र तु मंडलं ॥ शंखपुण्याहनादेन भूमौ

तमुपवेशयेत् ॥ मंत्रश्चात्र भवेद्रामतं मे निगदितः

शृणु ॥ क्षेमं च वसुधे देहि सदा सर्वगतं शुभं ॥ आयुः

प्रमाणं सकलं निक्षिप स्व हरि प्रिये ॥ अचिराद्ायुष

स्तस्य ये केचित्परिपंथिनः ॥ जीविता रोग्य वित्तेषु पुन

॥७५॥

ईत्वाचिरेणतत्॥ धरण्यंपशोषभूतानांमातस्त्वमधिकाद्य
सि॥ अम्बराचाप्रमेयाचसर्वभूतनमस्कृते॥ त्वमेवाशे
षजगतांप्रतिष्टाचास्तयोस्यसि॥ कुमारंपाहिमातस्त्वं
ब्रह्मातदनुमन्यतां॥ बालोपवैंनंकृत्वाभूमौब्राह्मण
पूजनं॥ ततःकृत्वायथाशक्तिकृत्सर्वंपुर्ववद्द्विजः॥ ए
तत्कुमार्याअप्युपलक्षणं॥ अथान्नप्राशनं॥ षष्टेमास्य
न्नप्राशनंनितिसूत्रं॥ कारिका॥ अथपुत्रस्यान्हिषष्टेतुमा
सेन्नप्राशनंभवेत्॥ कृत्वाभ्युदयिकंश्राद्धंदधिमध्वादि
संयुतं॥ तथाचस्मृतिः॥ षष्ठादशमेमासिद्वादशेवस.

मि

माचरेत् ॥ अयुग्मेमासिवैस्त्रीणामितिकेचिदुदीरितं ॥ अथचौलं ॥ तृतियेवर्षेचौलंयथाकुलधर्मंवेतिसूत्रं ॥ कारिका ॥ तृतीयेवर्षेचौलंकुर्वीतास्योत्तरायणे ॥ शुक्लपक्षेशुभर्क्षेतुहुत्वाभ्युदयिकंततः ॥ यथान्वयंतुकेषांचिदुपनिसासहेष्यते ॥ स्वस्तादि वाचयेत्पूर्वंवृद्धिपूर्त्तेषुकर्मसु ॥ मनुः ॥ चूडाकर्मद्विजातीनांसर्वेषामेवधर्मतः ॥ प्रथमेब्देतृतीयेवाकर्त्तव्यंश्रुतिचोदनात् ॥ तृतीयेप्रथमेवाब्देपंचमेसप्तमेपिवा ॥ चौलकर्मद्विजःकुर्यात्कुलधर्मानुसारतः ॥ अथचौलकृतेनियमः ॥ मदनपारिजाते ॥

॥ ७६ ॥

नग्नस्नात्वा च भुक्त्वा च वृष भारोहणं तथा ॥ त्रिरात्रं म[?]शु

चिः स्नात्वा त्रिभिः कृच्छ्रैर्व्यपोहति ॥ भक्ष्या भक्ष्ये तथा येये

वा च्या वा च्य तथा न्तेते ॥ यस्मिन्काले न दोषस्यात्स याव

न्नोप नीयते ॥ अनुपनतस्तु यो विप्रो मघं मोहा सेवेयदि ॥

तस्य कृच्छ्रत्रयं पित्रा मोक्षा वाप्यथवा तथा ॥ अथ चूडा

करणे वि[?]षः ॥ चूडाकर्म शिशोर्मातागर्भिणी यदि वा

भवेत् ॥ गर्भस्य वा विपत्तिः स्याद्दपसो वा शिशोरपि ॥

शिशोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत् ॥ गते तु पं

चमे वर्षे गर्भिण्यामपि कारयेत् ॥ यस्य मातरि गर्भिण्यां स

५ ५०

नो क्षौरं न कारयेत्॥ पंचाब्दाद्भागध्ये धेनु गर्भिण्यामपि
कारयेत्॥ अथ कुमारक्षतं॥ शिशु त्र त्रात्रा नाभाग
चौलं वालकस्मृतः॥ कुमारकस्तु विज्ञेयो चौलाद्वामो
ञ्जि बंधनं॥ शिरोर भ्युक्षणं प्रोक्तं बालस्याचमनं स्मृ
तं॥ रजस्वलादि संस्पर्शे स्नानाच्छुद्धिः कुमारकः॥ अथ
कर्मलोपप्रायश्चित्तं॥ आरभ्याधान माचौलात्कालाती
ते तु कर्मणां॥ आज्याहुतिभिरुक्ता प्रायश्चित्तं समाच
रेत्॥ एतेष्वेकैकलोपे तु पादकृच्छ्रं समाचरेत्॥ चौलकं ॥७७॥
र्मण्यति क्रांते पादकृच्छ्रद्वयं चरेत्॥ अथाक्षरस्वीकार

विधिर्लिख्यते ॥ द्वितीयजन्मतः पुर्वं अक्षराभ्यासमाव
रेत् ॥ मौंजीबंधनतः पश्चाद्व्हारं मो विधीयते ॥ पंचमेस
समेवाब्दे पूर्वस्यान्मौंजिबधनात् ॥ तत्रैवचाक्षराभ्यासः
कर्त्तव्यस्कद्गायने ॥ बृहस्पतिमतेचैवंतद्भावेधुना
च्यते ॥ सोम्यायनेप्रदोषादिवितृयेद्भृतबंधनात् ॥ अ
थनक्षत्राणि ॥ मृगादिपंचस्वपि भेषु मूलेहस्तादिके
चत्रितयेश्विनीषु ॥ पूर्वात्रयेच श्रवणत्रयेच विद्यास
मारंभमुशंतिसिध्यै ॥ हस्तत्रिके श्रोत्रत्रिकेपूर्वासु मृ
गपंचके ॥ मूलाश्विभेत्रपौष्णेषु मुखसंस्कारइष्यते ॥ अ ॥

दिसारिषु धारेषु विद्यारंभपूर्वकं मात्॥ आयुर्जडिमंम
तिमेधासुधिः प्रज्ञात्तनुक्षयः॥ अनध्यायाः प्रदोषाश्च
षष्ठीरिक्तातथैवच॥ वर्जनीयाः प्रयत्नेनविद्यारंभेषु
सर्वदा॥ विद्यारंभेशुभाः प्रोक्ताजीवज्ञसितवासराः॥
मध्यमोसोमसूर्यौ च निघः श्चैवशनिः कुजः॥ उदगा
ते भास्वतिपंचमाब्देप्राप्तेसरस्वीकरणं न्हि श्रुनां॥ सर
स्वतीविघ्नविनायकं च गुरोदनाद्यैरभिपूज्यकुर्यात्॥ ए
वंसुनिश्चित्तेकालेविद्यारंभंतुकारयेत्॥ फलमित्वा
हरिंलक्ष्मींदेवींचैवसरस्वतीं॥ एतेषामभेवदेवानांनां

न्मातुज्जुहुयाघृतं॥ प्राङ्मुखो गुरुरासीनः पश्चिमाभिमु
खः शिशुः॥ कुर्यादक्षरसंस्कारं पंचमेब्दे शुभे दिने॥
कृत्वासौ मंगलस्नानं नमस्कृत्वेष्टदेवताः॥ संपूजये
द्गणाधीशं तथा चैव सरस्वतीम्॥ नारायणं महालक्ष्मीं
गंधधूपादिभिः स्ततः॥ एतेषामेव देवानां तत्तन्मंत्रेण
पूजनं॥ कृत्वा होमं स्वगृह्योक्त आघारांतं समाचरेत्॥
देवतानां च मंत्रेण नाम्ना वा जुहुयाघृतं॥ एके कांच्या
हुतिं हुत्वा होमतंत्रं समापयेत्॥ पाटिकायां सुवर्णस्य
प्रसार्यं कुंकुमादिकं॥ तदभावे तथा[illegible]रोप्य हृत्वा वित्तानु स्व

५७०

॥७९॥

सारतः ॥ सुवर्णलेखनीकेन लिखेत्तत्राक्षराणि च ॥ ॐ नमः सिद्धनामेति वर्णानामनुक्रमात् ॥ अक्षराणि च संपूज्य स्वयमुष्टाथवाचयेत् ॥ गुरुरेवासे समासीनः कुमारस्तानिलेखयेत् ॥ पूजयित्वानुगंधाद्यैः पुनस्त्रिर्वाचयेदथ ॥ आचार्यपूजयेत्सम्यग्वस्त्रालंकारभूषणैः ॥ त्रिः प्रदक्षिणमाचम्य सर्वदेवताश्चापि वैष्णवं ॥ स्वविद्यास्र.... त्रेकरां स्वस्वविद्याश्चविशेषतः ॥ ब्राह्मणान्पूजयेद्भक्त्यागंधपुष्पाक्षतादिभिः ॥ तोषयेद्दक्षिणाभिस्तान्यथावित्तानुसारतः ॥ अ

९०

॥७९॥

थोपनयनं ॥ तत्रेदं गृह्यं ॥ अष्टमेवर्षे ब्राह्मणमुपनयेद्ग
र्भाष्टमेवेति ॥ तथा च मनुः ॥ गर्भाष्टमेब्दे कुर्वीत ब्राह्मण
स्योपनायनं ॥ गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः ॥
ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पंचमे ॥ राज्ञो बलार्थि
नः षष्ठे वैश्यस्येहार्थिनोष्टमे ॥ तथा च याज्ञवल्क्यः ॥
आषोडशाद्द्वाविंशाच्चतुर्विंशाच्च वत्सरात् ॥ ब्रह्मक्ष
त्रविशां काल औपनायनिकः परः ॥ अत ऊर्ध्वं पतंत्येते स
र्वधर्मबहिष्कृताः ॥ सावित्रीपतिता व्रात्या व्रात्यस्तोमादृ
ते क्रतोः ॥ अथ उपनयनकर्तारः ॥ आचार्यः ॥ पिता वाप
क

॥८०॥

नयनेसुत्रंतदभावेपितुःपिता ॥ तदभावेपितुर्भ्रातातद
भावेतुसोदरः ॥ पितामहोभ्रातासकुल्योगोत्रजोगुरुः ॥
उपनयनेधिकारीस्यात्पूर्वाभावेपरस्परः ॥ व्रतबंधंकु
मारस्यविनापितुरनुज्ञया ॥ यःकरोतिद्विजोमोहान्नरकं
प्रतिपद्यते ॥ इति [illegible]रस्थपितृविषयं ॥ तत्रसंस्कार्यः ॥
स्मृत्यर्थसारे ॥ औरसःपुत्रिकापुत्रःक्षेत्रजोगूढजस्त
था ॥ कानीनश्चपुनाउजोदत्तःक्रीतश्चकृत्रिमः ॥ दत्ता
त्माश्चसहोढाजस्वपविद्धस्तजस्ततः ॥ एतेद्वादश
पुत्राश्चसंस्कार्याःस्युर्द्विजातयः ॥ केचिद्दासुद्विजैर्जा

२

॥५॥

तौसंस्कार्यौकुंडगोलकौ॥ अमृते च मृतेपत्यौजारजौकुं
डगोलकौ॥ कालोदशानिषिद्धासुदौहित्रंचौरसंविना॥
॥संस्कारेनभवेत्सूर्द्धद्विति केश्विदुदीरितं॥ तथाचम
नुः॥ यएतेभिहिताःपुत्राःप्रसंगादन्यबीजिताः॥ य
स्यतेबीजतोजातास्तस्यतेनेतरस्यतु॥ अथोपनयने
बृहस्पतिबलं॥ शिरोमणौ॥ द्विःपंचसप्तनंदेत्रिंशस्थि
तोजीवःशुभप्रदः॥ व्रतबंधेतुपुत्रस्यकन्यायाश्चक
रग्रहे॥ जन्मत्रिदशमारिस्थःपूजयाशुभदोगुरुः॥
चतुर्थोष्टमस्थश्चद्वादशस्थोमृतिप्रदः॥ चतुर्थेद्वा

५० ८१

द्वशोजीवेद्धि गुरुंपूजयेद्गुरुं ॥ न शुभो [illegible] ष्टमरा[illegible]त्रिरास्थो
नतु पूजाशतैरपि ॥ धनमीनकुलीरस्थोजीवोजन्मोसम्भ
सूगः ॥ विवाहे भरवलो बंधेद्यबलोपिबलप्रदः ॥ कर्के
मीनधनुस्थोपिबदो श्वेदष्टमो यदि ॥ मविचार्यबलं
तत्रकारयेदुपनायनं ॥ स्वस्थ वर्षेन बलं गुरो श्वेच्छां
प्राशुशास्तंव्रतबंधकर्म ॥ अनुक्त वर्षे सुबलप्रदोपि
नैवेतयोरब्दबलो बलीयान् ॥ तथाचार्य विशेषमाह ॥
मुख्यकालस्त्कबलवान् व्रते गोचारशुद्धितः ॥ काला
तिक्रमणेचैवगुरुशुद्धिंनचिंतयेत् ॥ अथोपनयने

८१

प्रतिबंधः॥ नांदिश्राद्धे कृतेपश्चादुल्कापाताग्निवृष्टिषु॥
सुतकादिनिमित्तेषु न कुर्यान्मौंजीबंधनं॥ अथमातरिर
जस्वलायां निर्णयमाह॥ प्रचेताः॥ यस्य मांगलिकं का
र्यं तस्य माता रजस्वला॥ तदा न तत्र कर्तव्यमायुःक्षय
करं हि तत्॥ ज्योतिःसागरे॥ उद्वाहव्रतचूडासु माता य
दि रजस्वला॥ निवृत्तिस्ते न कर्तव्या सहत्वं श्रुतिचोदना
त्॥ नांदिश्राद्धे कृतेपश्चान्माता यदि रजस्वला॥ मौंजी
बंधनं कुर्वीत गर्गस्य वचनं यथा॥ योगसारावल्यां गर्गः॥
मातरं भोजनात्पूर्वं यस्य माता स्यात्तृणा यदि॥ तदा कर्म
न कर्तव्यं मंगलं कार्यशुद्धौ कार्यं ... ... ॥ ... विवाहस्य माता
यदि रजस्वला॥

५०

८२

नं कुर्वीत कुर्वीत यदि कुर्यान्निरर्थकं ॥ शौनकः ॥ वृद्धि श्रा
द्धे कृते पश्चाद्यदि माता रजस्वला ॥ तदा कर्म न कुर्वीत
यावद्भोज्यं न संगतं ॥ परत्रिंशन्मते ॥ मात्रा सहैव भुं
जीत ऊर्ध्वं माता रजस्वला ॥ व्रतबंधः परस्तस्यादि
त्याह भगवान्यमः ॥ नांदिश्राद्धे कृते यस्य भार्या रज
स्वला भवेत् ॥ विवाहे नैव दोषः स्याद्दोषः स्यान्मौंजी
बंधने ॥ धर्मार्थं कुरुते विप्रो मौंजीबंधनमेव च ॥ न
दोषो गर्भरजसोरित्याह स्मृतिसंग्रहः ॥ अथोपनय
नाहे तु मुहूर्ताच्छोभनाद्धः ॥ मात्रा सह वभुंजीया
५ नांदीश्राद्धे कृते पश्चाद्यस्य माता रजस्वला ॥ कन्यादाने पिता कु
र्यादिति कस्यायनोब्रवीत् ॥ ५

९०

८२

चौलमानेकभाजने ॥ शिखांहित्वावपेत्केशान्स्थापितान्
कुलधर्मतः ॥ शिखास्थानंभवेत्तत्रमध्येशिरसिवर्तुलं ॥
प्रमाणंतस्यचैवोक्तमाचार्येणद्विरंगुलं ॥ तथाचस्मृतिः ॥
समाप्यमात्रासहभोजनंचबहिर्निर्दध्याद्वपनाभिषेकः ॥
अलंकृतिर्लग्नपरिग्रहस्यान्मुखंसमीक्षितपरस्परंच ॥
कारिका ॥ ब्राह्मणस्योपनयनमुक्तकालेभवेदिह ॥ कृत्वा
३ भ्युदयिकंश्राद्धंपूर्वेद्युरपरेहनि ॥ कृतस्नानमलंकुर्याद्द्वि
जोवाचयेदथ ॥ भुक्तभोज्यस्यशिरसोवपनंस्नानमा
चरेत् ॥ एवंभूतंकुमारंतमवस्थाप्यांतिकेततः ॥ ज्योति

शास्त्रविंदुक्ते तु मूढ़ते शुनोभनेततः॥ इत्यादिस्वशाखोक्तवि
धिनाकर्मकर्त्तव्यमित्यर्थः॥ अथ स्वशाखाविषये॥ वासि
ष्ठः॥ स्वशाखाविधिमुत्सृज्यत्वमस्य विधिमाचरेत्॥ अप्र
माणमृषिं कृत्वा अंधे तमसि मज्जति॥ स्वकर्मपरिमुत्सृ
ज्य यदन्यत्कुरुते नरः॥ अज्ञानाद्यथवा लोभात्स सद्यः पतित
मुच्यते॥ ऋक्शाखिनैव कुर्वीत स्वकीयं परिशाखया॥
प्रमादाद्यदि कुर्वीत पुनः संस्कारमर्हति॥ यजुःशाखावि
धानेन यदि बद्धं च कर्म च॥ स्वतंत्रापि हितं कर्म पुनः कुर्या
द्यथाविधि॥ ऋक्शाखाविधिना कर्म यदि स्यात् स्वशा
पत्र नास्ति स्वशाखाचोदकं शाखोक्त समाचरेत्॥ पुनर्नो
र्हति संस्कारमन्यथा दैतिन्वे सुतः॥ ८३

रिचिनां ॥ नार्हतिपुनः संस्कारमितियज्ञविदां मतं ॥ अनुप्रव
चनं ॥ तिष्ठेदहर्शेषमस्तमितेब्रह्मौदनमितिसूत्रं ॥ कारि
का ॥ अहःशेषं ततस्तिष्ठेत्सायंसंध्यामुपास्य च ॥ पूर्ण
पात्रनिधानांतमुपलेपादिपूर्ववत् ॥ अन्यपक्षः ॥ उप
नीतो हि कुर्वीतसायंसंध्यामुपक्रमात् ॥ अग्निकार्यंत
तः कुर्यादौपनीयनिकानले ॥ अनुप्रवचनीयं च तस्मि
न्नेव कुर्त्ताशाने ॥ समन्वारब्ध आचार्यः श्रवणाकृतित्रयं
कुर्नेत् ॥ सायंसंध्यामुपक्रम्य ब्रह्मचारि समाचरेत् ॥
अपरेद्युः कृतः स्नातः प्रातःसंध्यामुपासते ॥ ४ ॥ अ

ग्निकार्यंततोभिक्षांसायंप्रातश्चपूर्ववत्॥ब्रह्मयज्ञंहि
गायत्र्यामध्यान्हेतुसमापयेत्॥५॥उपाकरणपर्यंतं
सावित्र्याब्रह्मयज्ञकं॥संध्यामाध्यान्हीकींकुर्याद्भाव्य
काराग्रवीरथ्या॥ब्रह्मचारिनियमः॥मेधाजननं॥क्षा
रादिवर्जमश्नीयात् ब्रह्मचारींदिनत्रयं॥त्रायीत्ताधः
श्चतुर्थेन्हिमेधाजननमाचरेत्॥आचार्योवाचयेन्मंत्र
सुश्रवःसुश्रवाइत्ति॥तत्रैवमेखलादीनिनवास्या
न्यानिधारयेत्॥मेखलामजिनंदंडवस्त्रयज्ञोपवी
तकं॥पालाशासंन्निधोसान्यानवमन्यानिधारये

त्।। नियमेन ब्रह्मचर्यमब्दं वापि समाचरेत्।। अन्यथा
कर्महानिस्यादिति यद्गुविद्गंमतं।। वाससीतेस्वगुरवे
मेधाजननकर्मणि।। दद्यात्तावत्स्वसेवं कौपीनेन प्र
वर्त्तते।। स्वस्यर्थसारे।। सदाकार्यंद्विजैः श्लक्ष्णं कौपीनं
कटिसूत्रकं।। कौपीनमहतं धार्यं खंडं वावस्त्रपार्श्वयु
क्।। कौपीनं कटिसूत्रं च यतेस्याद्ब्रह्मचारिणः।। ग्राह्यं
नैव गृहस्थस्य श्रौतेस्मार्त्ते च कर्मणि।। अथ महानाम्नि
व्रतानि।। कारिका।। माहानाम्न्यादि कुर्वीत तत्तत्काले
व्रतत्रयं।। उक्तकालेतदा स्यंतवापनाद्युपवीतिवत्।।

प्र०

८५

नवांभोजीनवंदंउंदत्वाखिष्टकृताद्यथा॥ संवत्सरंचरेदेत सुवर्णब्देत्कृतत्रायणे॥ अथोपाकर्म॥ तत्रेदं गृह्यं॥ अथा तोध्यायोपाकरणमोषधीनांप्रादुर्भावे श्रवणेन त्रायण स्यपंचम्यांहस्तेनवेति॥ तथाचकारिका॥ अध्यायाना मुपाकर्मश्रावण्यांश्रवणेनतत्॥ भन्मासेहस्तयुक्तायां पंचम्यांवातदिष्यते॥ अथ यद्योषधयः स्तस्मिन्मा सेतुनभवंतिचेत्॥ तदा भाद्रपदेमासिश्रवणेनकरो तितत्॥ गौकलः॥ मसद्व्येप्युपाकर्मनभवेद्यदिवे तदा॥ आषाढेश्रावणेमासेहस्तेवाकर्कटरवौ॥ तद

८५

भावेच्यन्यस्मिन्मासिवाश्रवणेकुर्यात्॥ नोदगयनइति॥ य
द्विचेदुभयव्याप्तिविहद्धंघटिकाद्वयं॥ तत्कर्मसफलंज्ञे
यंउपाकरणसंज्ञितं॥ पर्वण्युदयिकेकुर्युःश्रावणंतैत्तिरी
यकाः बह्वृचः श्रवणेकुर्युर्हस्तर्क्षेसामवेदिनः॥ धनिष्ठा
संयुतंकुर्याच्छ्रावणंकर्मयद्भवेत्॥ तत्कर्मसफलंज्ञेयंउ
पाकरणसंज्ञितं॥ संक्रांतौग्रहणेचैवमूढयोर्गुरुशुक्रयोः॥
उपाकर्मनकर्त्तव्यंसूतकेमृतकेपिवा॥ गर्गः॥ अर्धरा
त्रादधस्ताच्चेत्संक्रांतिग्रहणंभवेत्॥ गुरुभार्गवयोर्मूढबा
ल्येवावार्धकेपिवा॥ तथाधिमाससंसर्गेमलमासादिषु

द्विजैः॥प्रथमोपाहृतिनस्याद्धृतंकर्मविनाहृत॥अग्रा
ब्दिकंतुयत्कर्मक्रियमाणंनकुप्यति॥अथोत्सर्जनं॥अयो
त्सर्गेषण्मासानधीयतेतिसूत्रं॥कारिका॥आध्यायोत्सर्ज
